# सप्तम् प्रकरणम्

# वर्तमान समये वैदिकसाहित्यद्वारा लोककल्याणाय विचारप्रस्तुता ।

७.१ वैदिकवाङ्मयद्वारा विश्वकल्याणम्

७.१.१ पर्यावरेण विषयकचिन्तनम् ।

७.१.२ धर्मनिरपेक्षतावर्णनम् ।

७.१.३ समाजसंस्कृति निरूपणम् ।

७.१.४ विज्ञानविषयकचिन्तनम् ।

७.२ लोककल्याणकारकाः वेदस्य विषयाः ।

७.३ वेदेषु उत्तमगृहस्थधर्मविचारः ।

७.४ वेदेषु राजधर्मविचारः ।

७.५ वेदेषु उत्तमप्रबन्धविचारः ।

७.६ वेदेषु श्रेष्ठमानवनिर्माणस्य सङ्कल्पना ।

# सप्तम् प्रकरणम्
# वर्तमान समये वैदिकसाहित्यद्वारा लोककल्याणाय विचारप्रस्तुता ।

## ७.१ वैदिकवाङ्मयद्वारा विश्वकल्याणम् ।

प्रस्तुतः विचारयामश्चत्तर्हि वैदिकवाङ्मयं सम्पूर्णमपि विश्वकल्याणस्वरूपमेवास्ति । 'तेषां यथा पर्यावरणविषयकचिन्तनं, धर्म निरपेक्षतावर्णनं, समाजसंस्कृतिनिरूपणं, विज्ञानविषयकविवेचनमित्यादि नैकविधं ज्ञान निरूपणमुपलभ्यते । ज्ञानञ्चेदं विश्वकल्याणस्य कृते नितरामावश्यकम् ।

### ७.१.१ पर्यावरणविषयकचिन्तनम् ।

साम्प्रतकाले पर्यावरणविक्षेपस्य विश्वस्मिन् महती विपत्तिः विद्यते । विश्वस्य नैकेषां विकसितानामविकसितानाञ्च देशानां पर्यावरणविषये गाम्भीर्यपूर्णा चर्चा नैकशः श्रुयते । तदिह वैदिकसाहित्ये समाधानपूर्वकं कथ्यते ।

ऋग्वेदसंहितायां पर्यावरणविषयक विवेचनमपि विहितमस्ति । पर्यावरणशब्दः परि+आ उपसर्गपूर्वकं 'वृ' इत्यनेन सह ल्युट् प्रत्यययोगात् निष्पन्नो भवति । तस्यार्थः सर्वत्र वातावरणं यस्मिन् सर्वे आवृताः स्म । ऋग्वेदसंहितायां सृष्ट्युत्पत्तिविषयकसूक्ते सर्वत्र द्युलोक–अन्तरिक्ष तथा पृथ्वीलोकादीनां वर्णनमस्ति । सूर्य वायु–अग्नि इति त्रिविध प्रकृतितत्वः एतस्य लोकस्य मुख्यदेवाः सन्ति । यास्काचार्यः मनुस्मृतिकारः इत्यादयः अपि त्रिदेवं त्रिविधलोकस्य देवता कथयन्ति । ऋग्वेदसंहितायां वृष्टिविषयक त्रिविधलोकानां सहयोगविषयिकी चर्चा कृता विद्यते । यथा दिवा यान्ति मरुतो भूम्याग्निः अयं[१] वातो अन्तरिक्षेण यानि आदि भर्याति वरूणः समुद्रैः ॥

१. ऋग्वेदसंहिता–१/१६/१४

अर्थात् समुद्रात् प्राप्तजलं सूर्यातपद्वाराबाष्परूपेण उपरि नयति तथा अन्तरिक्षवायोः सहयोगात् मेघरचनां भवति तथा द्युलोके मरूतः वृष्टिः कारणं भवति ।

वेदसंहितायां विविधजीवयुतं सृष्टिविषयकं कथितमस्ति । जीवसृष्टि विनाशात् पर्यावरणमुपरि प्रतिकूलप्रभावो भवति । तस्मात् ऋषयः अभिज्ञाः आसन् । अरण्यानि सूक्ते । विविधसृष्टिं प्रति प्रतिबद्धतायाः चित्रणामपि कृतमस्ति । जीवसृष्टेः विविधतां रक्षितुं एका विशिष्टा नीतिः निर्धारिता वर्तते । तस्मात् अरण्ये स्थिताः वन्यपशवः अपि वक्ष्यक्षेत्रं न अतिक्रमन्ति । मानवः अपि वन्यक्षेत्रस्य अतिक्रमणं न करोति स्म । तथा वेदसंहितायां प्रकृत्याः सर्वअङ्गानां विधिवत् देवतारूपेण आह्वानञ्च कृतमस्ति । ऋग्वेदसंहिताया मांसाहारोपरि प्रतिबन्धं कृतोऽस्ति । एवम् एतादृशं दृष्कृत्यं यः कोऽपि करोति चेत् तं 'यातुधान' इति नाम्ना ज्ञायते । रूद्र 'यातुधान' इत्यस्य जैविकविविधतायाः उपयोगिता तथा महत्वविषयकं मन्त्रञ्च प्राप्यते । यथा च

न वा अरण्यानि हन्त्यन्यक्षेत्रमभिगच्छति ।[१]
त्वादौ कलयः जगध्वाय यथाकामं निपधते ॥

पर्यावरणस्य विविधतत्वेषु सूर्यदेवस्य स्थानं अत्यन्तं महत्वपूर्णमस्ति अतः ऋग्वेदसंहितायां १० सूक्तेषु सूर्यदेवतानाम् आह्वानं कृतमस्ति । सूर्यदेवस्य महिमा गानेनं जगति आत्मनः उपमा प्रदत्ता अस्ति । यथा –

सूर्य आत्मा जगतस्यस्थुषश्च ।[२]

---

१. ऋग्वेद–१०/१४६/१
२. ऋग्वेद–१/१६४/३५

अस्यां संहितायां समग्रसृष्टेः प्राणदायक वायुमण्डलस्य शुद्धताविषयकमपि यत्नं कृतोऽस्ति । वायुमण्डलस्य शुद्धताविषयकं यज्ञस्य नियमितरूपेण विधानं च कृतोऽस्ति । अतः यज्ञेव सर्वे देवानाम् आत्मा अस्ति (सर्वेक्षां देवानामात्मा यद् यज्ञः) इति कथितमस्ति । यज्ञे प्रज्वलित अग्नि हव्यपदार्थानां सूक्ष्म–विभाजनं कृत्वा प्रभावयुक्तं च कारयति । धूतस्य परमाणु धनीभावना कारणात् आकारो सधनस्तरं च रचयति तस्मात् वायुः अपि न गन्तुं शक्तोति । अतः बाष्पं तस्मिन् स्तरे स्थिता भवति । धनीभावनापूर्वकं संग्रहीतं बाष्परूपं जलं शीतवायोः संसर्गात् वृष्टिः भवति । एतेन जलेन समग्रसृष्टिः तृप्ता भवति । तथा स्वास्तित्वं स्थिरं च करोति । अतः एव कथितमस्ति – यत्

अयं यज्ञो भुक्नस्य नाभिः ।[१]

अर्थात् यज्ञमेव जीवनस्यनाभिरूपमस्ति । इत्थं यज्ञस्य नाभिद्वारा समग्रा जीवसृष्टिः पोषणं प्राप्नोति । विर्विधैः द्रव्यैः समुत्पन्नः धूमः वातावरणे स्थित विषयुक्तः वायु रोगादि प्रसारयन् सूक्ष्मजीवेत्यादीनां नाशं कृत्वा वातावरणं शुद्धं करोति । ऋग्वेदसंहितायां ऋतु विषयकं विवेचन प्राप्यते । यथा –

चत्वारिंश्यां शरधन्वविन्दत ।[२]

अत्र शरदृतोः उल्लेखः अस्ति । तस्मिन् ऋतु तथा कालादीनां समन्वये च दृश्यते । ऋतुनां यथार्थ उपयोगितां सह सम्बन्धमस्ति । ऋतुविषयकं वैज्ञानिक विवेचनं मन्त्रेऽस्ति । यथा च –

इदं सोमं पिब ऋतुना त्व विशंत्विन्दवः । मत्सरासस्तदोकसः ।[३]

---

१. ऋग्वेदसंहिता–१/१६४/३५
२. ऋग्वेदसंहिता–२/१२/११
३. ऋग्वेदसंहिता–१/१५/१

अत्र इन्द्राय ऋतु अनुसारं सोमपानं विषयकं कथितमस्ति । ऋग्वेदसंहितायां भौगोलिक तथा प्राकृतिकज्ञेभ्यः समुद्रस्य सर्वाधिकमहत्वमस्ति । ऋग्वेदसंहिताया समुद्रः तस्य सम्पदायाः विषये निर्देशान् प्राप्यन्ते । ऐतरेयब्राह्मणं पृथ्वी चतुःदिक्षु विस्तारीता अस्तीति वदति । ऋग्वेद-संहितायां मन्त्रेषु समुद्रस्य महत्वम् अस्तित्वं दर्शितमस्ति ।

यथा -

राय: समुद्राश्चतुरोऽस्मभ्यं
सोमविश्वतः आ पवस्य सहस्रिण ॥

अत्र कथितमस्ति यत् हे सोम । चतुर्दिक्षु समुद्रैर्व्याप्तभूमिखण्डस्य स्वामित्वं प्रयच्छतु तथा नैकेच्छाः पूरयतु च । द्वितीयमन्त्रेऽपि वर्तमानकाले उपलब्ध समुद्रस्य उल्लेखोऽस्ति ।

स्वायुधं स्ववसं सुनीधं
चतुः समुद्रं धरणं रयीणान् ।[१]

ऋग्वेदसंहितायां मध्ये शतुद्री तथा बिपाशा इत्यनयोः समुद्रेण सह मेलनस्य उल्लेखः अस्ति । तेन च विवेचकैः निश्चितं कृतं यत् दक्षिणभारते एकः समुद्र आसीत्, सः राजस्थानपर्यन्तं विस्तृतमासीत् । तं उपर्युक्तनद्यां मिलतः । ऋग्वेदसंहितायां दक्षिण तथा पश्चिमसमुद्रयोः निर्देशः अस्ति । तेनाधारेण दक्षिण-पूर्व-पश्चिम इति त्रिविध समुद्रानां पूर्वकालिक अस्तित्वं दर्शयति । चतुर्थसमुद्रः उत्तरसागरः हरिद्वारात् मानसरः पर्यन्तं विस्तृतमासीत् ।

---

१. ऋग्वे.सं.१०/४७/२

जलप्लवनात् दक्षिणस्य समुद्रः यथा स्थितः अभवत् । इत्थं भौगोलिकस्थितौ परिवर्तनमभवत् ।

पर्वतानामपि विवेचनं जातमस्ति । ऋग्वेदसंहितायां मध्ये नैकानां पर्वतानां निर्देशः अस्ति । अत्र मध्ये मुञ्जवत् वा मौजवत पर्वतम् उत्तरीयहिमालयस्य कैलासपर्वतस्य अङ्गमस्ति । तथा च हिमालयपर्वतं 'हिमवत्' वा 'हिमवन्त' इति विशेषणात् बहुवारं निर्देश कृतमस्ति । तथा चेन्द्रसूक्त मध्ये यः शम्बरं पर्वतेषु क्षियन्तम् । तत्र पर्वतानां निर्देशः अस्ति । ऋग्वेदसंहितायां अस्ति यत् पर्वतगुहासु पणिभिः चोरिता आर्याणां गावः इन्द्रेण मुक्ताः कृताः अस्ति । पर्वतेषु विविध द्रव्यानामपि ऋग्वेदे निर्देशः अस्ति ।

वैदिकभौगोलिकस्थितिभवज्ज्ञातुं नद्यः बहुपयोग्न्यिः सन्ति । ऋग्वेदे मुख्यतः बहुपयोगिन्यः सन्ति । ऋग्वेदे मुख्यतः त्रिशतः नदीनामुल्लेखः अस्ति । अंशुमती, अनन्ती, अनितथा, असिकनी, अपया, आजीकाया, कुम्भाकाबुल, कुलशी, क्रभु, गङ्गगा, गोमती, तुष्टामा, दृषद्धती, परुषी, मरुदवृधा, मे, यमुना, यव्यावती, रथस्या, रसा, वितस्ता, झेलम, विपाश, व्यास, विबाली, वीरपत्नी, शिका, शुतुद्री, सतलज, शयेव्या, सरयू, सरस्वती, सिन्धु, तथा च ऋग्वेदसंहितायामस्ति यत् आर्यैः विविधदेशप्रदेशजनपदानां स्थापनां कृत्वा विशालभूखण्डोपरि स्वस्य प्रभुत्वं स्थापितं कृतमस्ति ।

ऋग्वेदकाले विविधप्रदेशान् प्राच्य–उदीच्यदाक्षिणात्य – पौर्वात्य–इत्यादि दिशिवत्वकनामैः विविध प्रदेशाः ज्ञाता आसन् । एतरेयब्राह्मणे 'ऐन्द्रमहाभिषेक' पसङ्गे तत्कालीनभारतस्य विभिन्नराष्ट्राणां राज्याभिषेक परम्पराणाम् उल्लेखकाल प्राच्येषु साम्राज्याय दक्षिणत्येषु भोज्याय, प्राश्चात्येषु स्वराज्याय, उदिच्येषु वैराज्याय, ध्रुवमध्यदिशि राज्याय राज्याभिषेकं भवति स्म । ऋग्वेदे काशी,

कीटक, कुरु, गान्धार, चेदि, भरत, उशीनर, इत्यादि जनपदानां वर्णनं प्राप्यते । तथापि ध्रुवप्रदेशानामपि विवेचनं प्राप्यते । तथापि ध्रुवप्रदेशानामपि विवेचनं प्राप्यते । तस्मिन् उत्तरध्रुवम् इन्द्र तथा दक्षिणध्रुवं यमनाम्ना ज्ञायते । उत्तरध्रुवरूपेण इन्द्र उत्तरे तथा दक्षिणध्रुवरूपेण यमः दक्षिणे स्थितोऽस्ति । ऋग्वेदे सूक्तस्य ध्रुवपंक्ति 'विश्वस्मादिन्द्रः उत्तरः' अर्थात् इन्द्रः विश्वेस्मिन् उत्तरे अस्ति । अतः उत्तरध्रुवस्य नाम इन्द्रः अस्ति । विवेचनस्यास्य अर्थववेद संहितायां समर्थनं प्रदत्तमस्ति यथा च –

इन्द्रेणैव ध्रुवस्तिष्ठ राष्ट्रमुधारय ।

इत्थं ऋग्वेदसंहितायां पर्यावरणं तथा भौगोलिकस्थितिविषयकं विवचनं कृतमस्ति ।

### ७.१.२ धर्मनिरपेक्षतावर्णनम्

ऋग्वेदे धर्म, यज्ञयाग, देवतास्तवनादि केन्द्रस्थाने सन्ति । ऋग्वेदसंहितायां केचन एतादृशानि सूक्तानि सन्ति । येषु देवतास्तवनं या यज्ञयागं नास्ति । धर्म तथा यज्ञयागोदिना अन्य विषयैः सह सम्बन्धितसूक्तानां संक्षिप्तं विवेचनं क्रियते । धर्मनिरपेक्षसूक्तेषू 'अक्षसूक्तम्' प्रमुखस्थाने अस्ति । अत्र द्यूतविषयस्य मार्मिकरूपेण निन्दा कृता अस्ति । तस्मिन् द्यूतकारः स्वप्रलोभनानां वर्णनं कृत्वावदति यत् कथं द्यूतपाशं श्रुत्वा हृदयं कथं तं प्रति कर्षति । द्यूतजनं कोऽपि मित्रमपि सहाय्यं न करोति । पत्नी अपि तथैव च । अत्र उत्तमशब्दशैल्यां दयनीय स्थितिवर्णनं कृत्वा कथितमस्ति यत् अन्यजनाः मम भार्यां स्पर्शन्ति । माता–पिता–भ्रातादयः वदन्ति वयं एतं न जानीमः । यथा च –

पिता माता भ्रतार एनमाहुनं
जानीमो नयता बद्धमेतम् ॥[1]

सूक्तान्ते उपदेशं दत्वा कथितमस्ति यत् –

अक्षैर्मा दीव्य: कृषिमित् कृषस्व
विते रमस्य बहु मान्यमान: ।

तत्र गाय: कितव तत्र जाया
तन्मे विचष्टे सवितायमर्य: ॥[2]

अर्थात् पाशेन न क्रीडतु । कृषिं कुरु कृषिं कुरु तव धनम् अधिकं मत्वा सन्तोषं कुरु । इत्थं सूक्तस्य भावना अर्वाचीनभावनया सह पूर्णरूपेण सम्बद्धमस्ति तथा कृषिकर्मण: श्रेष्ठतां स्थापयित्वा कथितमस्ति अत: आकर्षितमस्ति ।

ऋग्वेदसंहितायां 'दानस्तुति' विषयक–सूक्तानि अपि प्राप्यन्ते । धर्मनिरपेक्षसूक्तेषु एतादृशसूक्तानामपि स्थानं महत्वपूर्णमस्ति । दानस्तुति: स्वरूपमवज्ञातु विद्वज्जनेभ्य: भ्रान्तिर्जाता । तेषां मतानुसारं राज्ञ: विपुलं धनयाचनां कृत्वा ऋषिभि: दानस्तुति: कृता किन्तु भारतीय वेदज्ञानां मतानुसारम् अपौरूषेयवेदेषु ऐतिहासिक घटना असंभवित अस्ति । दानस्तुतय: व्यक्तिविशेषस्य दानस्तुति: नास्ति किन्तु प्ररोचनानिमित्ते आख्यानानां कल्पनामन्त्रानामाधारेणानन्तरं कृता अस्ति । कात्यायनेन ऋक्सर्वानुक्रमणीमध्ये द्वाविंशतिसूक्ते दानस्तुतीनाम् उल्लेख: कृतोऽस्ति । किन्तु आधुनिक विद्वान् डॉ. मणिलाल पटेल महोदयस्य मतानुसारं अष्टषष्टिसूक्तेषु दानस्तुतीनामुल्लेख: अस्ति । ऋग्वेदसंहितायां दानस्तुति: कृता अस्ति । तथा च ऋग्वेद १०–११७

१. ऋग्वेदसंहिता १०/३४/४
२. ऋग्वेद.

मध्येदानमहिमायाः ओजस्वीवर्णनं कृतमस्ति । यः दानं न कृत्वा स्वार्थे एव धनोपयोगं करोति सः पापमेव खादति । वस्तुतः मित्रं नास्ति यत् अत्यन्तं स्नेहं कारयन् मित्रं वा परिचितेभ्यः दानं न ददाति । एतादृशेन मनुष्येण दूरे वासः श्रेयस्करमस्ति । तस्य कृते तदेव आश्रयमस्थानं गृहं नोच्यते । आश्रयं प्रयच्छन् अपरिचिते प्रति गमनं योग्यमस्ति । सूक्तेऽस्मिन् त्यागमूलकवैदिकसंस्कृत्याः महामन्त्रं व्यक्तं च कृतमस्ति । यथा –

मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वधं इति सतस्य ॥[1]
नार्यमणं पुष्यति नो सखायं केवलाधो भवति केवलादी ॥

अर्थात् हृदिपूर्वकं दानं न कारयन् व्यर्थमेव अन्नं प्राप्नोति । निश्चयेन सत्यमेव वदामि तदेव तस्यवधमस्ति । सः आर्यमान नास्ति । मित्रेभ्यः न पोषयति । केवल पापमेव खादति । इत्थं 'केवलाधो भवति केवलादी' इति वैदिक संस्कृतिमहिमा एव भगवद्गीतायां पुनः प्रगटीभूता भवति यथा च –

यज्ञशिष्टाशिनः सन्तो
मुच्यन्ते सर्वकिलिम्बषैः
भुञ्जते ते त्वधं पापा
ये पचन्त्यात्मकरणात् ॥[2]

धर्मनिरपेक्षशैल्यां रचित–सूक्तेषु महत्वपूर्णसूक्तं मण्डुकसूक्तमस्ति । वर्षर्तोः आरम्भे मण्डूकान् जाग्रयितुं सार्थकवर्णनं च कृतमस्तीति ज्ञायते । सूक्तमिदं निः सन्देहः हृदयराम्यमस्ति । सूक्ते मण्डुकानां रटणं सोमद्वारा आनन्दित ब्राह्मणानां मन्त्रगानेन सह समानतां च कृता अस्ति यथा –

१. ऋग्वेदसंहिता १०/३४/१३
२. भगवद्गीता–३/१३

ब्रह्मणासो अतिरात्रे न सोमो
सरो न पूर्णमभितो वदन्तः ।
संवत्सरस्य तदहः परिष्ठ
यन्मण्डूका प्रावृषीणं बभूव ॥[१]

अभिरात्रं नाम्नः सोमयज्ञे सोमेन परिपूर्णपात्रं परितः उपविश्य मन्त्रोच्चारकर्तारः ब्राह्मणाः जलपरिपूर्ण सरपरितः रटयन' कथयन्ति हे मण्डूकाः । यदा प्रथमा वृष्टिर्भवति तदा भवन्तः उपस्थिताः आसन् । रटणमिदं विद्यालये अध्यापकं परितः शिष्यानामालापेन सह साम्यतां धारयति । यथा –

यदेषामन्यो अन्यस्य वाचं
शाक्तस्येव वदति शिक्षमाणः ।
सर्व तदेषां समृद्धेव पर्व्रं
यत्सुवाचो वदथनाध्यप्सु ॥

अर्थात् यथा शिष्यः गुरो वाण्यनुसरणं करोति तथैव एकमेव आलापं रटयन् भवतां शरीराणि पुष्टानि भवन्ति ।

इत्थमत्र धर्मनिरपेक्षताद्वारा विश्वकल्पाणस्य भावना वर्णिता विद्यते ।

### ७.१.३ समाजसंस्कृतिनिरूपणम् ।

मनुष्यः जन्मतः मृत्युपर्यन्तं समाजेन सह संयुक्तः अस्ति । मानवजीवनं भागद्वये विभक्तमस्ति वैयक्तिकं – सामाजिकं च । समाजस्य उन्नतिः सुखं च तदा एव भवति । यदा भागद्वये संवादितता भवेत् । ऋग्वेदिकविवेचने द्वयोः संवादितता दृश्यते । वर्णाश्रमव्यवस्थाद्वारा व्यक्तिसमाजयोः उत्कर्षः सम्यक् भवति ।

ऋग्वेदसंहितायां वर्णशब्दस्य उल्लेखः अस्ति । वर्णशब्दस्य प्रयोगः जातिः वा प्रकाशार्थे भूतोऽस्ति । बहुषु स्थानेषु वर्णशब्दस्य प्रयोगः जनसमुदाय कृतेऽस्ति ऋग्वेदे पुरूषसूक्ते चतुवर्णानामुत्पत्तिविषयकं विवेचनमस्ति । यथा च

ब्राह्मणस्य मुखमासीद् बाहु राजन्यः कृतः ।[१]
ऊरु तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥

अर्थात् ब्राह्मण–क्षत्रिय–विट्–शुद्राश्च क्रमशः मुख–बाहु–जङ्धा–पादादिषु समुद्र–भूतास्सन्ति । वर्णव्यवस्था सर्वत्र देशकालो विद्यमानः वर्तते । ऋग्वैदिकवर्णव्यवस्था गुणकर्मादीनामाधारेण अस्ति जन्माधारेण न, इति निर्देशः ऋग्वेदसंहितायमपि वर्तते । यथा

कारुरहं ततो भिषगुलप्रक्षिणी नना ।
नानाधियो वसूयवोऽनु गाव तस्थितमंन्द्रा येन्द्रो परिस्रव ॥

अर्थात् अहं कविः अस्मि । मम पिता वैद्यः अस्ति । मम माता गृहकार्यं करोति इत्थं भिन्न–भिन्न रित्या धनोपार्जनं वयं कुर्मः । सर्वदा वयं गौः शोधयामः । इत्थं हे सोम ! इन्द्राय रसं प्रवाहितं च भवेत् । वेदाध्ययन तथा यज्ञसम्पादन ब्राह्मणानां कर्तव्यमस्ति । राष्ट्ररक्षा न्याय व्यवस्था क्षत्रियाणां परमं कर्तव्यमस्ति । ऋग्वेदसंहितायां 'जीवेम शरदः शतम्' शतं वर्षाणि जीव्यासमित्यादिषु शतं वर्षाभ्यन्तरं जीवनस्य अभिलाषा कृता अस्ति । चतुर्विध–आश्रमेषु २५–२५ वर्षाणां सीमा निर्धारिता कृता अस्ति । शतं वर्षेषु कर्मानुष्ठानाय तथा उत्तरार्धे ज्ञानानुष्ठानाय निर्धारितं कृतमस्ति । पूर्वार्धे

---

१. ऋग्वेदसंहिता १०/५०/१२

ब्रह्मचर्याश्रमगृहस्थाश्रमयोः समावेशो भवति । अत्र कर्म सम्पादनस्य प्रधान्यम् अस्ति तथापि ज्ञानार्जनाय तारतम्यता भवति । उत्तरार्धे वानप्रस्थाश्रम – संन्यस्ताश्रमयोः समावेशो भवित । अत्र मात्र ज्ञानार्जनाय एव प्रधान्यं भवति । समष्टिरूप समाज तथा राष्ट्रस्य योगक्षेमाय आत्मद्रष्टा ऋषिभिः आश्रमधर्मस्य व्यवस्था कृता अस्ति । मर्यादा तथा सदाचारादीनां परिपालनाय व्यक्तेः सम्पूर्णजीवनं चतुर्विध कालखण्डे प्राकृतनियमानां आधारोपरि आश्रम–धर्मस्य व्यवस्था कृता अस्ति । मनुष्ये प्राकृत शक्त्यानुसारं परिवर्तनं तथा विकासं च भवति । ज्ञान तथा कर्मादीनां योग्यविकासाय आर्यऋषिभिः ब्रह्मचर्याश्रम–गृहस्थाश्रम–वानप्रस्थाश्रम–संन्यासाश्रम इत्यादीनां आश्रमाणां स्थापना कृता अस्ति । आश्रमेषु प्रथमद्वयोः वैशिष्ट्यं प्रवृत्तियुक्तं तथा अन्तिमद्वयोः वैशिष्ट्यं निवृत्तियुक्तं चास्ति ।

ऋग्वेदसंहितायां नैतिकता तथा सदाचारादीनां बहूनि रूपाणि दृश्यन्ते । एतस्तिन् एकस्मिन् सूक्ते वरूणदेवं प्रार्थना कृता अस्ति यत हे वरूणदेव । पापाचरणं मम सकल्पं नास्ति किन्तु मदिरा–क्रोधादि व्यसनानां सेवनं विचारहीनता अस्ति अस्मान् पितृपापेभ्यः विमुक्तं कारयतु । यथा च

न स स्वो दक्षो वरूणः ध्रुतिः सा<br>
सुरा मन्युर्विभीदको अचितिः ।<br>
अस्ति ज्यायान्कनीयस उपरि<br>
स्वप्रश्चनेदनृतस्य प्रयोता ॥

ऋग्वेदसंहितायां बहवः स्थलेषु सदाचार विषयकोपदेशाः अवलोक्यन्ते । ऋग्वेदसंहितायां 'ऋत' सिद्धान्तः तत्कालीन सत्यनिष्ठ, नैतिकपरायण तथा अनुशासनबद्धसमाजस्य उदाहरणमस्ति । ऋतेन सृष्टेः उत्पत्तिः भूता तेन एव

नियन्त्रणं च भवति । यथा – च –

ऋतेन ऋतं धरूणं धारयन्ति ।[1]

एषा चारित्रिक श्रेष्ठतायाः महत्वं सामाजिकं – भौतिकं वा दृष्ट्या नापितु आध्यात्मिक दृष्ट्या अपि महत्वमस्ति कारणं तं मुक्त्याः आधारं च मन्यते । आर्याः सूर्य–चन्द्रमसौ आदर्शं मत्वा कल्याणकारी सत्यपथोपरि गन्तुं कामना कुर्वन्ति । यथा –

स्वस्ति पन्थामनु चरेम सूर्यचन्द्रमसाविव ।[2]
पुनर्ददताध्नता जानता सं गमेमहि ॥

ताण्डयब्राह्मणेऽपि ऋतेनैव स्वर्गलोकं गच्छति । अर्थात् ऋतस्य परिपालनेन स्वर्गलोकस्य पुष्टिः भवति इति च कथितमस्ति । नैतिकतायाः परिपालनाय ऋग्वेदसंहितायां सप्तमर्यादा दर्शिता अस्ति यथा हिंसा–चौर्यव्यभिचारं–धूतं – मदिरापानं – असत्यवचनमित्यादयः निषेधात्मकप्रवृत्त्याः समावेशो भवति । यथा –

सप्तमर्यादाः कवयस्ततक्षु स्तासामेकामिदभ्यंहुरो गात् ।[3]
आयोर्ह स्कम्भ उपमस्य नीके यथां विसर्गे धरुणेषु तस्थौ ॥

मानवजीवनस्य विकासाय साधनरूप संस्काराणां विवेचनं प्राप्यते । संस्कारशब्दस्य सामान्यार्थः योग्ययं रचयन् इति भवति । ऋग्वेदे संस्काराय संस्कृतशब्दस्य प्रयोगो भवति । वैदिकसाहित्ये मुख्यतः षोडशसंस्काराः सन्ति । तेषु गर्भाधान–पुंसवन – सीमन्त – जातकर्म– नामकरणं – निष्क्रमणं – अन्नप्राशनं

१. ऋग्वेदसंहिता ५/१५/२
२. ऋग्वेदसंहिता ५/५१/१५
२. ऋग्वेदसंहिता १०/५/६

– चौलकर्म–कर्णवेधः – उपनयनं – व्रतादेशः वेदारम्भः – केशान्तं – समावर्तनं – विवाहः – अग्निपरिग्रहः इति षोडशसंस्काराणां समावेशो जायते । ऋग्वेदसंहितायां विवाहसंस्काराय विशेषं महत्व प्रदानं कृतमस्ति । ऋग्वेदे विवाहसंस्काराय १०,८५ सूक्तम् अर्पितमस्ति । विवाहसंस्कारात् गहृस्थाश्रमस्य प्रारम्भो भवति । विवाहसमये पुरूषः कन्यायाः हस्तग्रहणं कृत्वा अग्निपरिक्रमां करोति । तदा तेभ्यः कर्तव्यपालनम् – उत्तरदायित्वादीनां निर्वाहणं कर्तुं उपदेशं प्रदीयते । अत्र प्रसिद्धमन्त्रेण तेभ्यः आशीर्वादमपि प्रदत्तमस्ति । यथा च –

इहैव स्तं मा वियौष्टं विश्वमायुर्व्यश्नुत्तम् ।
क्रीडन्तौ पुत्रैनप्तृभि मोदमानो स्वे गृहे ॥

अर्थात् तौ अत्रैव भवतः, भिन्नं मा भवतः । पुत्र–पौत्रैः सह क्रीडां कृत्वा गृहे एव आयुष्यं पूर्णं कारयेत् । तथा च अग्निपरिग्रहविषयक पञ्चसूक्तानि प्राप्यन्ते । मृतकस्य विसर्जनं वैदिकशास्त्रीय विधिपूर्वकेण अग्निदाहद्वारा भवति स्म । संन्यासी जनेभ्यः तथा बालकाय पृथव्यां समाधिः प्रयच्छति स्म् । विद्याध्ययनाय ब्रह्मचर्याश्रमे प्रवेशकाले उपनयनसंस्कारमपि भवति स्म । तथा च अन्यसंस्काराणामपि निर्देशः ऋग्वेदे प्राप्यते ।

"प्रजापतिर्वै यज्ञः"[१] अर्थात् यज्ञ तथा सामाजिकजीवनस्य विकासाय यज्ञं आवश्यकं मन्यते । श्रौत तथा गृह्य इति वैदिकज्ञानां भेदद्वयभस्ति । अनन्तरं श्रोतयज्ञस्य सोमसंस्था तथा हविसंस्था इति भेदद्वयं च भवति । गृहयज्ञस्य पाकसंस्था इति एकमेव भेदः अस्ति । त्रिविधविभागाः यज्ञस्यापि पुनः सप्त–सप्त भेदाः भवन्ति इत्थं २१ भेदाः भवन्ति ।

१. शतपथब्राह्मणम्–१/७/१/५

**(अ) सोमसंस्था ।**

अग्निष्टोमः, अत्याग्निष्टोम, अक्थ्य, षोडशी, वाजपेय, अतिहोत्र तथा आप्तोर्याम ।

**(ब) हविसंस्था ।**

अग्न्याधेय, अग्निहोत्र, दर्शपौर्णमास, आग्रयण, सौत्रामणी, चातुर्मासस्य पशुबन्धः च ।

**(क) पाकयज्ञः**

सायं होमः, प्रातः होमः, स्थालीपाकः, नवयज्ञः, वैश्वदेवः, पितृयज्ञः, अष्टका च ।

तथैव दैनिककार्येषु पञ्चमहायज्ञस्य महत्वपूर्णं स्थानमस्ति । ब्रह्मयज्ञ, पितृयज्ञ, देवयज्ञप भूतयज्ञ, नृयज्ञ इति पञ्चयज्ञसमूहं पञ्चमहायज्ञनाम्ना विज्ञायते । ऋग्वेदसंहितायामपि यज्ञ उपरान्त तप तथा दानादीनां विवेचनमपि प्राप्यते । आत्मदर्शी, ऋषि, महर्षि, संन्यासी इत्यादि तपश्चर्यादीनां जीवितरूपम् आसीत् । तस्य सिद्धिः तपद्वारा एवं भवति । तपद्वारा एव ब्रह्मासृष्टेः उत्पत्तिः कृतवान् तथा तपसा एव ऋषिभिः वेदानां ज्ञानं प्राप्तं कृतम् । यज्ञ तपोपरान्त दानविषयकं विवेचनमपि ऋग्वेदे प्राप्यते । ऋग्वेदानुसारं यः गोदानं करोति सः स्वर्गे उच्चस्थानं प्राप्यते । यः अश्वदानं करोति सः सूर्यलोकं च गच्छति । यः सुवर्णदानं करोति सः देवता भवति । तथा यः वस्त्रदानं करोति सः दीर्धजीवनं प्राप्नोति ।

तथा च ऋग्वेदसंहितायाः अनुसारं राजा पृथुश्रवा ७० सहस्रस्य अश्वानां, दशसहस्रस्य, गवां दानं चकार । ऋग्वेदानुसारं यदुवंशिना आसंगेन नृपतिना दशसहस्राणि गावः दानरूपेण प्रदत्ताः आसन् इति उल्लेखः प्राप्यते । इत्थं यज्ञतप – दानादीनां सङ्गामः ऋग्वेदकालीने समाजे दृश्यते ।

**ऋग्वेदसंहितायां पारिवारिकं तथा सामाजिकजीवनविषयकं विवेचनम् ॥**

ऋग्वेदे पारिवारिक तथा सामाजिकजीवनविषयकमपि विवेचनं प्राप्यते । पारिवारिक जीवनविषयकं विवेचनं प्राप्यते । परिवारः सामाजिकजीवनस्य आधारशीला अस्ति । ऋग्वैदिककाले संयुक्त–कुटुम्बस्य प्रथा आसीत् । गृहपतेः अथवा कुलस्य अनुशासने परिवारस्य सर्वे सभ्याः वसन्ति स्म । तस्य च निर्देशानुसारं कर्तव्यपालनं भवति स्म । ऋग्वेदसंहितायाः जायेदस्तं शब्देन ज्ञायते यत् पत्नी एव गृहस्वामिनी आसीत् तथा यज्ञानुष्ठाने पतिं सहायं कुर्वती आसीत् । तथा च नार्यः अपरं नाम गृहमासीत् । यथा –

जायेदस्तं मधवन्त्सेदु योनि – [१]
स्तदित्वा युक्त हरये वहन्तु ।
यदा कदा च सुनवाम सोम –
मग्निष्ठा दतो धन्वात्यच्छा ॥

ऋग्वेदे स्वनीर्य पारिवारिक जीवनस्य दिव्यसन्देशः प्रदत्तोऽस्ति । ऋग्वेदानुसारं केनापि सह वैरं–वैमनस्यं न कुर्वन्ति सुखपूर्वकं गृहस्थाश्रमे निवासः करणीयः । पूर्णायुमवाप्य पुत्र–पौत्रैः सह आनन्दपूर्वकं परिवारे वसितुं उपदेशश्च प्रदतोऽस्ति । यथा –

---

१. ऋग्वेद सं.–१०/८५/४२

आ नः प्रजां जनयतुप्रजापति –[१]

राजरसाय सम नक्त्वर्यमा ।

अदुर्मुङ्गलीः पतिलोकमा विश

शं नो भव द्विपदे शं चतुष्पदे ॥

तथा च अन्यमन्त्रानुसारं ब्रह्माण्डस्य समस्त शक्ति तथा विद्वतो वयं जानीमः । अस्माकं हृदि जलसमं स्वच्छं शान्तं च अस्ति । द्वयोः प्राणशक्तिः धारणाशक्तिः उपदेशः ग्रहणशक्ति परस्परं कल्याणकारी भवति । यथा च

समञ्जन्तु विश्वे देवाः

समापो हृदयानि नौ ।

सं मातरिश्वा धाता

समु येष्ट्रीं दधातु नौ ॥

पति–पत्नी विवाहविधिद्वारा मिथः मिलितः । ऋग्वेदकाले विवाहस्य मुख्य प्रयोजनं सुसन्ततिप्राप्तिः आसीत् । ऋग्वेदे विवाहसम्बन्धः व्यक्तेः सदाचार, नैतिकता तथा समाजस्य उत्कर्षाय भवति स्म । तदा विवाहाय असमानगोत्रस्य व्यवस्था कृता आसीत् । तत्काल विभिन्नगोत्रयुक्त पति–पत्नी मात्र सन्तान प्राप्तिमवाप्नुवन्ति । वैदिककाले विवाहसंस्कार सम्पन्नं विधातुं समारोहादीनां आयोजनं भवति स्म । ऋग्वेदे विवाहविधिनां निर्देशः प्राप्यते । पाणिग्रहणं तथा प्रतिज्ञा अनन्तरमग्निपरिक्रमा भवति । ऋग्वेदे ब्रह्म–दैव, आर्ष, प्रजापति, आसुर, गन्धर्व, राक्षस, पैशाच इत्यादय अष्टविधविवाहाः प्रचलिताः आसन् । तथा च सतीप्रथायाः निषेधं कृत्वा विधवाविवाहस्य आदेशोऽपि प्रदत्त आसीत् । यथा च –

---

१. ऋग्वेद सं.–१/८५/४७

उदीर्ष्व नार्यभि जीवलोकं[1]

गतासुमेतमुप शेष एहि ।

हस्तग्रामस्यं दिधिषोस्तवेदं

पत्युर्जनित्वमभि सं बभूय ॥

अर्थात् हे स्त्री । जीवित जगति आगच्छ, त्वं यस्य समीपं सुप्ता अस्ति सः मृतोऽस्ति । त्वं तव पत्यौ पत्नीत्वभावात् प्रविष्टा भूता अस्ति । अहं तव हस्तं स्वीकरोमि । तं स्निह्यामि । ऋग्वेदे क्रमशः १.१६१.११ तथा च १०.८५.३७,७८ इत्यादिषु बहुपत्नीत्वप्रथायाः निर्देशाः प्राप्यन्ते । तथा च नियोगपद्धतिविषयकमपि वर्णनमुपलभ्यते । यः कोऽपि निःसन्तानमृत्युं प्राप्नोति सा विधवायाः सजातीयव्यक्तिः नियोगद्वारा सन्ततिः प्राप्तुं शक्नोति । यथा –

कुह स्विद्दोषा कुह वस्तोरश्विना [2]

कुहाभिपितत्वं करतः कुहोषतः ।

को वा शयुत्रो विधवेव देवरं मर्य

न दोषा कुणुते सधस्थ आ ॥

वैदिकयुगे नारीणां स्थानं पुरूषसमं महत्वपूर्णमासीत् । विवाहकाले स्त्रीमाशीर्वादान् ददाति स्म । यत् त्वं कुटुम्बिजनान् उपरि आधिपत्यं स्थापितं कुरु । सर्वे च तव इच्छानुसारंमनुकुलमाचरणं कारयेयुः । यथा –

साम्राज्ञीश्वसुरे भव साम्राज्ञी श्वश्रवां भव ।[3]

ननान्दरि साम्राज्ञी भव साम्राज्ञी अधिदेवेषु ॥

---

१. ऋग्वेद सं.–१०/१८/८

२. ऋग्वेद सं.१०/८५/४६

३. ऋग्वेद सं.५/७/१०

इत्थं ऋग्वेदे नारीणां स्थानं महत्वपूर्णमासीत् । ऋग्वेदे आर्याणां भोजनादीनामपि विवेचनं च प्राप्यते । आर्याणां प्रमुखभोजनं यवदुग्धमासीत्त । एवं च अपूप, करप्म, सक्तु, पुरोडाश इत्यादि आर्याणां स्वादिष्टं भोजनमासीत् । दुग्धप्रधानं पेयद्रव्यमभवत् । दुग्धात् भिन्नान्-भिन्नान् भोज्यपदार्थान् कारयन्तः आसन् । दुग्धं सोममिश्रितं कृत्वापि पीयते स्म । दुग्धात् दधि कारयते स्म । दधिमन्थनेन नवनीतोत्पादनं क्रियते तस्मात् धृतं भवति स्म । ऋग्वेदकालीने समाजे स्फुर्तिवर्धकसोमरसमपि प्रमुखपेयमासीत् ।

ऋग्वेदसंहितायां वेशभूषाविषयकं वर्णनमपि दृश्यते । सामान्यतः द्विविधवस्त्राामुल्लेखः प्राप्यते । अधोवस्त्रम् उत्तरीयञ्च । ऋग्वेदसंहितायां पेशसनाम्न एकवस्त्रस्योलेखः प्राप्यते । पेशस वस्त्रं स्त्रियः रचयन्ति स्म । तथा च स्त्रियः रेशमनिर्मितवस्त्राणि धारयन्ति स्म । ऋग्वेदेमरूतानां स्वर्णयुक्त वस्त्राणामपि उल्लेखान् प्राप्यन्ते । स्त्रीणां वस्त्रेषु सामान्यतः नीविः, नीविबन्धः, स्तनांशुक इत्यादीनां समावेशः भवति । तथैव पुरूषवस्त्रेषु उत्तरीय-अधोवस्त्रं शिप्रस्त्राणादीनां च वर्णनमुपलाभ्यते । तथा च ध्वस्र-पुरूषाति नाम्ना नृपेण ३०००० वस्त्राणि दानेषु प्रदत्त्प्रनि सन्तीति । केशविन्यास वेणी इत्यादीनां प्रथा अपि आसीत् । वेणी कृते 'ओपश' शब्दस्य प्रयोगः भवति स्म । अन्य एकस्मिन् स्थले कन्यासज्जता तथा श्रृंङ्गारविषये उल्लेखः अस्ति । पुरूषाः अपि वेणी धारयन्ति स्म । रूद्र-पुषन् द्वयोः ऋग्वेदे वेणीयुक्तौ कतिथौ स्तः । पुरूषस्य मुखरोमाय 'श्मश्रु' इति शब्दप्रयोगः अस्ति ।

ऋग्वेदसंहितानुसारं कर्ण सुशोभनाय कुण्डलानां स्पष्टील्लेखः वर्तते । वैदिककाले सुवर्णकुण्डलस्य प्रचलीनमभवत्। तथा च ऋग्वेदसंहितायां पुरूषाणां कर्णाभुषणस्य उल्लेखः प्राप्येत । वक्षमाला अपि धृता आसीत् । आर्याणां

सुवर्णयुक्तमालायाः उल्लेखः अस्ति । मध्ये कण्ठे च धर्तुं निष्कइत्यस्य उल्लेखः वर्तते । हस्ते सुवर्ण कुङ्कणं धारणाय उल्लेखः विद्यते । इत्थं भिन्नायाः भिन्नायाः वेश–भूषायाः ऋग्वेदे प्रचलनमभवत् ।

ऋग्वेदे स्त्रीशिक्षणस्य पूर्णप्रचारः बभूव । तथा स्त्रियः वेदाध्ययनं कुर्वन्ति स्म । बहवः सूक्तानां दर्शनमपि ताभ्यः भुतमभवत् घोषा, लोपामुद्रा, अपाला, विश्ववारा, सूर्या इत्यादीभिः ऋषिकाभिः अपि एकैकस्य सूक्तस्य रचना कृता वर्तते । तदा नार्यः गानविद्या, नृत्यकला–इत्यादिषु निपुणाः आसन् । ऋग्वेदकाले स्त्रीभ्यः विविधकलायाः शिक्षणं प्रदानं कुर्वन्तः आसन् ।

### ७.२.४ विज्ञानविषयकविवेचनम्

सर्वज्ञानमयो हि वेदाः । इति ऋग्वेदेविज्ञानविषयकं विवेचनं प्राप्यते । पृथ्वीग्रह – रेवती – अश्विनी – धूमकेतु – सूर्य – तारका – दीनां विस्तृतं वर्णनं प्राप्यते ।

इयं विसृष्टियर्त आ बभूय ।[१]

अर्थात् एषा सृष्टिः समुत्पन्ना भूता इति । कथनमत्र कृतमस्ति कार्यं कारणं विना शक्यं नास्ति । अतः सृष्टेः उत्पत्तेः कृते उत्पत्ति कर्तुः अपेक्षा भवति । अतः ऋग्वेदे कथितमस्ति । यत् –

द्यावाभूमि जनयन् देव एकः ।[२]

अर्थात् द्यावा–भूमि इत्यादीनां जनकः एकः देवः अस्ति । ऋग्वेदे 'बिग–बैग' इत्यस्य रहस्यं च प्रगटयते । तद् हिरण्यगर्भ तथा महदग्निपिण्ड

१. ऋग्वेद सं.१०/१६६/४
२. ऋग्वेद सं.१/११६/५८

इत्यस्य च पर्यायः अस्ति । महदग्निपिण्डं मार्तण्डमिति च उच्यते । तस्यार्थः विस्फोटपिण्ड इति च भवति ।

महा ऊर्जा यज्ञे अग्न्याः ताण्डवं च अभवत् । अग्नि ताण्डवरूप यज्ञदृष्टा मात्र ईश्वरः एव आसीत् । अत्र आधुनिक कोस्मोलोजी ब्रह्माण्डविज्ञानस्य तत्वाः ऋग्वेदे प्रतीकरूपेण प्राप्यन्ते । एतस्मिन् नानासूर्यः इति उक्त्वा आकाशगङ्गायां विद्यमानानां बहूनां सूर्याणाम् उपस्थित्याः निर्देशः अस्ति । इत्थं ऋग्वेदे संहितायां खगोलविज्ञानस्य सजीवं चित्रणं च दृश्यते । ऋग्वेदे अश्वसहित अवकाशयानं तथा रथानां सन्दर्भाः उपलभ्यन्ते, यः वस्तुतः विमानमेव आसीत् । अश्विनिकुमारयोः त्रिविध – चक्राणि स्तम्भयुक्तं रथं विमानमेव अभवत् अन्यमन्त्रेषु अश्वरहितरथ–त्रिलोके च भ्रमति । अन्यमन्त्रेषु – श्येनपत्वा सुमृलीकः अर्थात् गरुडवत् शीघ्रगामी तथा मर्त्यस्य मनसो जवीयान् । अर्थात् मनुष्यस्य मानसमेव गतिवान् अश्विनीकुमाराणां रथानां वर्णनमस्ति । यथा च –

'त्रिधातुना पतयोर्विन पर्णैः'[१] अर्थात् त्रिधातुना निर्मिता विमानपक्षयोः वर्णनमस्ति । महर्षि भारद्वाजः अंशुबोधिनी नामाभिधग्रन्थे २८ प्रकरणे वैमानिक प्रकरणस्य आरम्भे त्रवीहृदयसन्दोह साररूपं वैमानिकं प्रकरणं कथ्यते । इत्युक्त्वा वेदानाम् आभारश्च प्रकटितोऽस्ति । ऋग्वेदे विमानाय त्रिलोकविमानं दिव्यस्थः स्वचालितविमानं, मधुवाहनं, त्रिपुरावाहनम् इत्यादि विशेषणानामुपयोगः कृतोऽस्ति ।

ऋग्वेदसंहितायां वनस्पतिविज्ञानषियकं वर्णनं च प्राप्यते । वनस्पपिविज्ञानस्य रहस्यं प्रतिपादनं कृत्वा ऋग्वेदे कथितमस्यि यत् एतस्मिन्

---

१. ऋग्वेद सं.१/११२/१२

लोके यथा शशि विविधयत्नेन सांसारिकदु:खेभ्य: रक्षणं करोति तथैव वनस्पति अपि यत्नपूर्वकं विविधदु:खान् सहनं कृत्वा मनुष्याणां रक्षणं करोति अत: एव कथितमस्ति । यत्

या औषधी: पूर्वा जाता
देवेभ्यस्त्रियुगं पुरा ।
शतं वो अम्ब धामानि
सहस्रमुत वो रूह: ।

एतस्मिन् मन्त्रे वनस्पत्या: औषधरूपेण कथितमस्ति । औषधी शब्दस्य निर्वचनं कृत निरूक्तकार वदति यत् – ओषं धयेति तत् औषधय: समभवन् । इति अत: सिद्धयते एतस्मिन् यत् एतस्मिन् लोके यथा शशि विविधयत्नेन सांसारिकदु:खेभ्य: रक्षणं करोति तथैव वनस्पति अपि यत्नपूर्वकं विविधदु:खान् सहनं कृत्वा मनुष्याणां रक्षणं करोति अत: एव कथितमस्ति । यत्

"औषधीरिति मातर: ।"[१] सर्वेषां माता वनस्पति समस्त सृष्टिमध्येवसन् जीवान् प्राणवायुं पूर्णं कृत्वा तस्य रक्षणं करोति अत: एव कथितमस्ति यत् –

"प्राणो वै वनस्पति: ।" ऋग्वेदसंहिताया: अरण्यसूक्ते दीर्धकालात्' स्वाश्रमं स्थाने पुन: आगत: ऋषिणा आश्रमस्य वनस्पति, औषधि, वृक्षादि नष्टं दृष्टवा आत्मग्लानिना वनदेव्या: क्षमां याचति । वनदेव्या: प्रार्थना कृत्वा कथितमस्ति यत् –

न वा अरण्यानि हन्त्यन्यक्षेत्राभि गच्छति ।[२]
स्वादो: फलस्य जगध्वाय यथाकामं निपद्यते ॥

---

१. ऋग्वे.१/११८/१
२. ऋग्वे.१/१८३/१

अत्र ऋषिः वनस्पत्याः प्रार्थनां कृत्वा कथयति यत् कापि उपादेन वनस्पतिनष्टं न भवेत् । भौतिकविज्ञानविषयकमपि विवेचनं प्राप्यते । अनेकेषु मन्त्रेषु एतस्य सन्दर्भाः प्राप्यन्ते । एतस्मिन् कथितमस्ति यत् ऊर्जायाः नाशं न भवति किन्तु रूपान्तरमेव भवति । यथा च –

अग्नि त्वमना शतिनं पुरुरूपम्र् ।[१]

स्तीर्णां अस्य संहतो विश्वरूपाः ॥[२]

इमा हि त्वाभूजो वर्धयन्ति वसूयवः सिन्धवो न क्षरन्तः ।[३]

इत्थमुर्जा विश्वव्यापिनी वर्तते । शक्तिरेषा निश्चयपूर्वकं वर्धिता भवति तथा पदार्थानां शक्तिसमुद्रः कदापि क्षयं न प्राप्नोति । वेदेषु वर्णित इन्द्र, मित्रावरूण, रुद्रादिशब्दाः ऊजार्याः प्रतीकरूपमात्रमस्ति । अत्रैव सूर्यप्रकाशगतिः विषयकमपि कथितमस्ति । यथा च –

तरणिविश्ववदर्शतो ज्योतिष्कृदसि सूर्यः ।

विश्वमाभासि रोचनम् ॥

अत्र अतिशीघ्रेण प्रसार्यमात्र – प्रकाशस्य निर्देशोऽस्ति । सायणाचार्यः वदति । तथा च स्मर्यते यत्

योजनानां सहस्रे द्वे  द्वे शते द्वे व योजन्ते ।[४]

एकेन निमिषार्धेन क्रममाण नमोऽस्तु ॥

---

१. ऋग्वेद सं.१/९१/१२
२. ऋग्वेद सं.१०/९७/४
३. ऋग्वेद सं.१/३४/११
४. मनुस्मृति २/७

सूर्यस्य किरणानि २२०२ योजनानि अर्धनिमेषमात्रे यात्रां करोति । योजन इत्युक्ते ९ कि.मी. अत: प्रकाशस्य गति: १८६४११३.२२ कि.मी. प्रति निमेषमात्रे निश्चित भवति । आधुनिकवैज्ञानिका: अपि १८६३०० कि.मी. प्रतिनिमेषमात्रे च गणयन्ति । तथा च ऋग्वेदे मध्ये अस्ति यत् ऋषय: गुरूत्वाकर्षणबलेन परिरिता: अभवन् एकस्मिन् सूक्ते अस्ति यत् सूर्य: ग्रहमण्डले स्थायी सर्वे ग्रहा: स्वकक्षायां स्थापिता: भवन्ति । अत्र सूर्य परित: सौरमण्डलस्य निर्देशं कृत्वा गुरुत्वाकर्षण सिध्धांन्तं च समर्थयन्ति ।

ऋग्वेदे वृष्टिविज्ञानविषयकमपि विवेचनं प्राप्यते । वृष्टे: कृते यज्ञस्य विशेषमहत्वं स्वीकृतं विद्यते । यज्ञाग्निं समर्पितानि द्रव्याणि विद्युत्कणीभूतानि भवन्ति । यज्ञस्य अग्निशिखाद्वारा दग्धं द्रव्यं यथा वायुं भूत्वा वातावरणं गच्छति । तदा तस्य सूक्ष्मतत्वानि तडित्शक्तियुक्त्वानि भवन्ति । तेषु एव कानिचित् धनविद्युत्युक्तानि , कानिचन च ऋणविद्युत्युक्तानि भवन्ति । द्वयो: धनात्मवायु: क्रमश: हाईड्रोजनवायो: अणुद्वयं तथा ओक्सिजवायो: एकाणु अनुपातेन विद्युत: सञ्चारेण जलं भवति । आकाशे एतत् क्रम: सदा प्रचलति । ऋग्वेदे एतत् क्रमचक्रं 'मित्र' 'वरूण' नाम्ना विज्ञायते । यथा –

मित्रं हुवे पूतदक्षं वरूणं च रिशादसम् ।<br>धियं धृताचीं साधन्ता ॥

इत्थं मित्रावरूणौ मिलित्वा वृष्टिकारयत: इत्यपि मन्यते ।

ऋग्वेदसंहितायां वस्त्रविज्ञानविषयकमपि विवेचनमुपलभ्यते । वस्त्राय वासस् – वसन – अम्बर– पट – चौलम् इत्यादय: शब्दा: प्रायोजिता: दृश्यन्ते । अत्रैव पञ्चविधवस्त्राणां वर्णनं कृतमस्ति ।

१. सूतीवस्त्रम् – कार्पासिकपत्रादि ।

२. रेशमीवस्त्रम् – कौशेयं, क्षैमं च ।

३. ऊनीवस्त्रम् – आविक, कम्बलादि च ।

४. चर्मवस्त्रम् – अजिनादि ।

५. वल्कलम् – चेति ।

ऋग्वेदे सूत्रनिर्माणं वयः नाम्ना ज्ञायते । उपर्युक्तनिर्देशाधारेण ज्ञायते यत् तत्कालीन समाजे वस्त्रविज्ञानस्य पूर्णविकासः आसीत् ।

ऋग्वेदसंहितायां विद्युतः विषयकमपि विवेचनं प्राप्यते । 'विद्युत्' शब्दः 'वि' उपसर्गपूर्वकं 'द्युत' धातुद्वारा निष्पन्नो भवति । विद्युतः पर्यायरूपेण हेति, नेमि, नभ, वज्र, अशनी, निग्म, कुत्स, अर्क इत्यादयः प्रयुज्यन्ते ।

ऋग्वेदे प्रकाशयुक्त तथा शीघ्रतायुक्त तथा पदार्थयोः धर्षणेन समुत्पन्ना विद्युत । प्रचाल्यमानस्य रथस्यापि वर्णनं, वज्रपात, युद्धसाधनानि, वायुद्वारा उत्पन्ना विद्युत् इत्यादीनमपि विवेचनं प्राप्यते । ऋग्वेदे ऊर्जाचकं विषयकं विवेचनं प्राप्यते । ऋग्वेद मध्ये अन्नप्राचयनं, मेधे स्थिता अग्नि तथा रसानां दोहनं कारयन् सूर्यरूपेण अग्नि इति त्रिविध–अग्नेः वर्णनं विद्यते । जलोर्जा सौरऊर्जायाश्च वर्णनं लभ्यते ।

तथा च भूगर्भिया ऊर्जा तापविद्युत् अभियान्विकी हवि तथा अग्निद्वारा उत्पन्नोजायाः अपि वर्णनमस्ति ।

वैज्ञानिकं संशोधनं तथा बहूनां तथ्यानां विवेचनं च प्राप्यते । तच्च नैकभाष्यग्रन्थेषु विमानविद्या–नौविधा–तारविधा–शिल्पविधा–गृहनिर्माणकला इत्यादीनां वर्णनेन विज्ञायते ।

संक्षेपेणेहीपप्रकरणे वैदिकवाङमये पर्यावरणचिन्तनेन, धर्मनिरपेक्षतावर्णनेन, समाजसंस्कृतिनिरूपणद्वारा, वैज्ञानिकचिन्तनेन तथा चान्यैश्च बह्वुभिः ज्ञानमार्गैः विश्वकल्याणस्य मार्ग पुरस्कृतोऽस्ति । किन्तु अत्र कानिचित् तथ्यभूतानि तत्वानि समीक्ष्य उपप्रकरणमिदं समाप्यते ।

### ७.१ लोककल्याणकारकाः वेदस्य विषयाः

वेदस्य सर्वेऽपि विषयाः लोककल्याणकारकाः सन्ति सकलहेतुस्वार्थपरमार्थ साधकत्वात् । मानवजीवनस्य परमलक्ष्यं पुरूषार्थचतुष्टयसाफल्यं वर्तते । तथा श्रूयते –

आहारनिद्राभयमैथुनञ्च सामान्यमेतत् पशुभिः नराणाम् ।
धर्मो हि तेषां मिधिको विशेषः धर्मेण हीनाः पशुभिः समानाः ॥

अर्थात् मानवजीवनस्य साफल्यं धर्मतत्वस्य साधनया भवति । सः धर्मः कीदृशोऽस्ति यतः सर्वेऽपि हेतवः सिद्धयन्ति । तदिहोपप्रकरणे निरूप्यते ।

### ७.२ वेदोऽखिलो धर्ममूलम् ।

अथ कोऽयं वेदशब्दस्यार्थः – वेदशब्दो हययं विद्ज्ञाने, विद्लाभे, विद् सत्तायां, विद् विचारणे इति चतुभिर्धातुभिर्व्युत्पाद्यते तत्र सायणाचार्यादयो हि भाष्यकृतो विद्यन्ते ज्ञाप्यन्ते धर्मादि – पुरूषार्थ चतुष्ट्योपायाः अनेनेति ज्ञापनार्थकात्, वेद्यन्ते लभ्यन्तेऽनेन पुरूषार्था इति लाभार्थकाद्वा धत्रि विशेषतो निर्वृवते । सुविदितमेव वैदिकवाङ्मयविदां विदुषां यद् "वेदोऽखिलो धर्ममूलम" इति महामानवेन मनुना सम्पूर्णस्य धर्मस्य मूलत्वेन वेदा एवोपन्यस्ताः । यतो हि सर्वेषां धर्माणां प्रचारकाः स्वं स्वं धर्मं वेदमूलकमेवामनन्ति । धर्मार्थकाममोक्षमेतच्चतुष्टयामपि तन्मूलकमेव इति सुविदितम् । वेदशब्दस्य

विवेचनदृष्टयापि सुविदितम् । वेदशब्दस्य विवेचनदृष्ट्यापि पूर्वोक्त एव विचारः सम्पुष्टिं याति तद् यथा वेद्यन्ते, ज्ञायन्ते, लभ्यन्ते वा धर्मादिपुरूषार्था एभिरिति वेदाः । तेषामुल्लेखो यथा – ऋग्यजुः सामार्थर्वण नामधयाः । एतेषाम् अनिष्टपरिहारपुरस्सरमिष्टप्राप्तेः लौकिकं प्रकारं यो वेदयति स वैदः । अत ए व महर्षिणा सायणेन कृष्णयजुर्वेदीयभाष्यभूमिकायां परिभाषारूपमिदं पद्यमुपन्यस्तम् –

प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते ।
एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता ॥

महर्षिणा स्वामिवर्य्यैण दयानन्देनापि स्वकीयायाम् ऋग्वेदभाष्यभूमिकायां स एवार्थः प्रकारान्तरेण प्रमाणीकृतो विलसनि । यथा विदन्ति, जानन्ति, विद्यन्ते, भवन्ति सर्वाः सत्यविद्या यैर्येषु वा स वेदः । सर्व मतावलम्बिनः प्राच्याः पाश्चात्याश्च विद्वांस एकमत्या स्वीकृर्वन्ति यद् वेदा अखिलविद्यानाम् आकरभूता विराजन्ते । अत एव एतेषाम् अपौरूषेयत्वं सुप्रसिद्धम् । किन्तु कालनिर्णय विषये सार्वत्रिकाः सुविधयः पृथक् – पृथक् प्रमाणविलमाश्रित्य परस्परं विवदमानाः दृष्टिपथमायान्ति । नाद्यावधि कस्मिन्नपि मते विदुषाम् ऐकमत्यजनि । इदं सर्वेऽङ्गीकुर्वन्ति यद् वेदा अस्माकं धर्मग्रन्थत्वेन च विराजन्ते । इति वेदानाश्रित्यैव अस्माकं प्राचीनैर्महर्षिभिः लोकोत्तरं यशः समुपलभ्य निखिलमपि जगत् करामलकीकृतमासीत् । सत्यंवद, धर्मं चर, मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव, इत्याद्युपदेशश्रृंखला वेदानामेव चिराञ्जागर्ति वसुधातले ।

यमनियम – प्राणायाम – प्रत्याहार – धारणा ध्यान – समाधिभिः । सदाचारस्य स्वस्य धर्मस्य च पालनं कर्तव्यमित्यपि वेदा एव सङ्गिरन्ते । न

केवलम् आर्यवंशीया भारतीया एव वेदान् प्रणमन्ति अपितु अन्य धर्मावलम्बिनो विजातीया विदेशीया अपि वेदा तथैव समादृतान् कुर्वन्ति यथा स्वधर्मग्रन्थान् ।

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुता द् वेदो मामयं प्रहरेदिति ॥

यद्यमिदं स्मारयति यत् वेदेषु मन्त्ररूपेण यत् सूत्रीकृतो ज्ञानराशिवर्तते तस्य एव विस्तारः स्मृतिषु पुराणेषु इतिहासादि ग्रन्थेष्वपि वरीवार्ति न च किमपि नूतनम् । अतः संसारस्य धर्मग्रन्थानाम् मध्ये वेदा एव सनातनाः प्राचीनतमाश्च चत्वारो वेदाः तेषां केचनोपवेदत्वेनापि प्रथितास्तेषां नामानि आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः, अर्थशास्त्रं चेत्यादयः सुप्रसिद्धाः । वेदाङ्गत्वेन विख्याताः शिक्षा, कल्पो, व्याकरणं, निरूक्तं, छन्दो, ज्योतिषञ्च । अथोपाङ्गानि पुराणानि, न्यायशास्त्रं, मीमांसाशास्त्रं, धर्मशास्त्रादीनि च । अत एव भारतीयानां मतमिदं यत् स्वयम्भुवा सृष्ट्यादौ वेदाः समुपदिष्टा न तु तेषां रचना कृता । यथा –

अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा ।
नित्या वेदाः समस्तश्च शाश्वता विष्णुबुद्धिगा ॥
सर्गे सर्गेऽमुनैवेत उदगीर्यन्ते तथैव च ।

अत एतेषां नित्यत्वं ज्ञानविज्ञानानामाकत्वं च सुस्पष्टं सिद्धयति । वैदिकः सर्वतन्त्रः स्वतन्त्रो धर्मः । तत्र भगवतः स्वरूपम् । सः अजरः, अमरः, शुद्धः, निर्विकारः, निर्विकल्पः, सर्वशक्तिमान्, सर्वज्ञः, कर्तुमकर्तुमन्यथाकर्तुं च समर्थः स एव सृष्टि-स्थिति – प्रलय – कर्ता च । अत एवोक्तं यत् – "एकं सद् विप्रा बहुधावदन्ति" । स एव मोक्षप्रदाता, पुनर्जन्मकर्ता च । पुनर्जन्मनि श्रद्धधानाः भारतीयाः यदि स्वसंस्कृतेर्मूलां दिदृक्षवस्तर्हि तस्याः सत्ता वेदेष्वेव ।

एकत्र प्रसङ्गे भगवता मनुना सुस्पष्टं प्रतिपादितं यत् "नास्तिको वेदनिन्दकः" । यतो हि वेदा ईश्वरीयज्ञानपूर्णाः । अतः एव तत्पदानवर्तिनो ब्राह्मणाण्यककल्पोपनिषत्प्रभृतिभिः तथा सवैश्वास्तिकदर्शनैः निर्विरोधं वेदानामीश्वरीयज्ञात्वम् अङ्गिनकृतम् वेदेषु वर्णाश्रमधर्मस्य विचारः समुपभ्यते, मनुष्याः स्वकर्मादिभेदप्रभावेणैव पंचधा विभाजिताः । यथा – ब्राह्मणः, क्षत्रियः, वैश्यः, दासः (शूद्रः) दस्युश्च, अनार्य एव दस्युः । एतेषां जीवनं चतुर्षु आश्रमेषु विभज्य तेषां व्यवस्था विहिता वर्तते ।

चत्वार आश्रमाः – ब्रह्मचर्य्य – गृहस्थ – वानप्रस्थ – संन्यास – संज्ञकाः । एतेषु प्रथमो ब्रह्मचर्याश्रमः, मानवजीवनस्य मूलाधारः अनेनैव जीवनं सुखमयं भवति, एतस्य विषये सुक्तिर्विराजते यत् – "ब्रह्मचर्येण तपसा देवा मृत्युमुपाध्नत" । तदनन्तरं गृहस्थाश्रमः यत्र स्त्रीपुंसयोः समानाधिकारो भवति, ततः वानप्रस्थाश्रमः अन्ते संन्यासाश्रमः इत्येषो विभागः ।

वेदानां वर्णनं स्वल्पकीयेऽस्मिन्नुपप्रकरणे कथमपि नैव शक्यमिति निश्चित्य कतिपय मुख्यविषयाः समीक्ष्य संक्षेपेणैव सूत्रिताः, वेदेषु राष्ट्रभावनायाः समादरो विलोक्यते, आत्मनस्तोषाय परेषां मांसभक्षणनिषेधः, द्युतस्यैव भेदरूपम् अक्षक्रीडां निषिध्य कृषिकर्मणः स्तवनमुपलभ्यते । तद्यथा – "अक्षैर्मादीव्यः कृषिमित् कृषस्व "इति ऋक् । द्यूते पराजितस्य पुरूषस्य दशायाः उल्लेखः

जाया तप्यते कितवस्य हीना माता पुत्रस्य चरतः क्व स्वित् ।
ऋणा वा बिभ्यद्धनमिमानोऽन्येषामस्तमुपमक्तमेति ॥

एवम्प्रकारका बहुविधा उपदेशा वेदेषु सर्वत्र आकररूपेणानुस्यूताः विराजन्ते, येषामनुसरणेन मानवः स्वकीयं सम्पाद्य सुखभाग्भवति, अन्यांश्च सुखयति । अत एवोक्तं यथा –

ज्ञानविज्ञानराशीनां स्रोतसामुद्‌भवोयतः ।
वेदाख्यं शाश्वतं धाम तदहं कलयेऽनिशम् ॥

वस्तुतः उपप्रकरणमिदं विज्ञापयति यत् धर्मार्थकाममोक्षमूलकं वेदानां विज्ञानेन समन्वितं वेदस्य ज्ञानमेव लोककल्याणकारकं विद्यते ।

तच्चेह धर्मतत्वं, ईश्वरवादः, वर्णाश्रमव्यवस्था, राष्ट्रभावना, मांसभक्षणनिषेधः, अक्षक्रीडानिषेधः इत्यादिभिः नैकैः प्रमुखविषयैः प्रतिपाद्यन्ते ।

## ७.३ वेदेषु उत्तम गृहस्थ विचारः ।

धर्माधारितं मानवजीवनं सर्वश्रेष्ठं कल्प्यते । किन्तु मानवजीवनस्य कालक्रमः तस्य जीवनावस्थाधारितोऽस्ति । तद्यथा श्रुतिषु स्मृतिषु चाऽपि मानवस्य प्रकल्पितं वर्षशतात्मकं जीवनं चतुर्धा विभक्तं दृश्यते । तच्च ब्रह्मचर्याश्रमः, गृहस्थाश्रमः, वानप्रस्थाश्रमः, संन्यासाश्रमश्चेति । मनष्यस्य उपरि यावद् दायित्वं वर्तते तस्य निखिलस्य निर्वाहः एषु चतुर्षु आश्रमेषु चरन् एव परमं पदम् प्राप्तुं समर्थों भवति, नान्यथा । तद्यथा वैदिकमन्त्रोऽपि कथयति यत् -

तच्यक्षुर्देवहितम्पुरस्ता च्छुक्रमुच्चरत् ।
पश्येम् शरदः शतञ्जीवेम शरदः शतम् ॥

शतं शृणुयाम् शरदः शतम्प्रबृवाम शरदः । शतमदीनाः स्याम् शरदम्भूयश्च शरदः शतात् ॥

''यः सर्वथा जीवति वर्षशतंजीवति'' ''शतायुर्वै पुरूषः'' इति वैदिकवचनानुसारं प्रत्येकाश्रमः पञ्चविंशतिवर्षात्मको गणनया सिद्धयति, तेषु

प्रथमः ब्रह्मचर्याश्रमः, द्वितीयः गृहस्थाश्रमः, तृतीयः वानप्रस्थः, चतुर्थाश्रमः, संन्यासाश्रमः । इमे आश्रमाः जीवनस्य मूलाधारत्वेन बोभवीति । तत्रापि कथ्यते सुभाषितकारेण 'धन्यो गृहस्थाश्रमः' एतादृशस्योतमस्य गृहस्थविचारः वेदेषु नैकशः बहुषु स्थाने प्रतिपादितो विलोक्यते । अतः विलिख्यते यत्

वानप्रस्थं भैक्ष्यचर्यं गार्हस्थ्यं च महाश्रमम् ।
ब्रह्मचर्याश्रमं प्राहुश्चतुर्थं ब्राह्मणैर्कृतम् ॥

अर्थात् वेदवर्णितः गृहस्थविचारः सर्वान्नितिशेते ।

समावर्तन (विद्याप्राप्त्यनन्तरं) संस्कारानन्तरं विवाहसंस्कारपूर्वकं गृह्वस्थाश्रमो भवति । गृहस्थस्य उत्तमविचाराः । वेदेषु विवर्णिताः दरीदृश्यन्ते । देव-ऋषि-पितृऋणात् मुक्त्यर्थं विवाहसंस्कारः आवश्यकः । ''सहोभौ चरतां धर्मम्'' इत्यादि श्रुत्यनुसारेण कर्मविधानेऽधिकारस्य प्राप्त्यर्थं विवाहसंस्कारः अत्यावश्यकः । वेदवचनमपि वर्तते यत् -

''ब्रह्मचर्यं समाप्य गृही भवेद् गृहाद्वनी भूत्वा प्रव्रजेत्'' तमेनं वेदवचनानुसारेण ब्राह्मणा विविदिषन्ति ।

वेदानधीत्य वेदो वा वेद वाऽपि यथाक्रमम् ।
अविप्लुतब्रह्मचर्यो गृहस्थाश्रममावसत् ॥

मनुस्मृतावपि श्रुयते यत् ।

चतुर्थमायुषो भाग मुषित्वाऽद्यं गुरौ द्विजः ।[१]

---

१. मनुस्मृति-४/१

द्वितीयमायुषो भागं

कृतदारो गृहे वसेत् ।

पत्नीवन्तो नमस्यं नमस्यन् ॥[1]

यज्ञेन दानेन तपसाऽनाशकेन । सह वा आत्मयाजी यो वेद । इदं मेऽनेनाङ्ग संस्क्रियत इदं मेऽनेनाङ्गमुपथीयते । विशुद्धं वस्तु तं पश्यति निष्फलं ध्यायमानः । जायमानो वै ब्राह्मणस्त्रिभिर्ऋणैः ऋणवान् भवति ।

महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः ।

यस्यैतेऽष्टाचत्वारिंशत्संकाराः ॥

ऋणानि त्रीण्यपाकृत्य मनोमोक्षे निवेशयेत् ।

ज्ञानमुत्पद्यते पुंसा सायात्पापस्य कर्मणः ॥

वरः पितृगृहात् कन्यां सम्मानपूर्वकं स्वगृहं नयेत् । अस्मिन् संस्कारे वाग्दानं, हस्तमेलापकं (पाणिग्रहणम्), अग्निप्रदक्षिणा, लाजाहोमः, सप्तपदी इत्येतानि मुख्याङ्गानि भवन्ति । गृहस्थस्य कुटुम्बिनः पारिवारिक जनानां कृते सुखप्रदानकर्त्री भवेत् । यथा –

स्योनो भव श्वसुरेभ्यः स्योना पत्ये गृहेभ्यः ।[2]

स्योनास्यै सर्वस्यै विशे स्योना पुष्टायैषां भव ॥

गृहस्थाश्रमे पञ्चमहायज्ञानामत्यावश्यकतायारूल्लेखः ऋग्वेदे प्राप्यते । गृहस्थेन हि षट्कर्मणां, भाव्यम् । तस्य नित्यकृत्यानि यथा –

स्नानं सन्ध्या तथा होमः स्वाध्यायो देवतार्चनम् ।

दानं च संविभागश्च पञ्चयज्ञाः न हाययेत् ॥

---

१. ऋग्वेद–१/७२/५

२. अथर्ववेद–१४/२/२७

गृहस्थाश्रमः त्रयाणामाश्रमाणामाधारः वर्तते । तस्य मुख्योद्वेश्यः धर्मार्थकाममोक्षादीनां पुरूषार्थचतुष्टस्य प्राप्तिरति । यथा –

यथा वायुं समाश्रित्य सर्वे जीवन्ति जन्तवः ।
तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः ॥

यस्मात्त्रयोऽप्याश्रमिणो

ज्ञानेनान्नेन चान्वहम् ।
गृहस्थेनैव धार्यन्ते तस्माज्ज्येष्ठाश्रमो गृही ॥

वैदिक गृहस्थजीवनस्यादर्शः वर्तते विषयोपभोगानन्तरं जीवन्विकासः न तु विषयेषु परिलिप्तिः । ऋग्वेदे वर्णनं प्राप्यते यत् गृहस्थजीवने औरसपुत्रप्राप्त्यनन्तरमुन्नतजीवनम् । यथा –

स्वजन्मना शेषसा वावृधानाम् ।[१]

अर्थात् गृहस्थजीवने पुत्रपौत्रादियुक्तोऽहं वसामि ।

प्रजावतीषु दुर्यासु दुर्य ।[२]
मा छंदमरश्मीन् ।[३]
वंश परम्परायाः तन्तुमहं मा छेदमी ।[४]
मा शूने अग्नि नि षदाम नृणाम् ॥
पुत्रपौत्रादिरहितगृहे नाहं वसामि[५]
प्रजावन्तं स्वपत्यं शयं नः ।

१. ऋग्वेद–७/१/१२
२. ऋग्वेद–७/१/११
३. ऋग्वेद–१/१०९/३
४. ऋग्वेद–७/१
५. ऋग्वेद–७/१/१२

अस्मान् पुत्रपौत्रादियुक्तगृहं सदपत्यान् च प्रयच्छस्च ।[१]

प्रजावन्तो अनमीवा अनागसः ॥

वयं सन्तायुक्ताः निरोगी एवञ्च निष्पापयुक्ता भवम् ।

अस्थुरि नो गार्हपत्यानि सन्तु[२]

अस्माकं दाम्पत्यजीवनं सुसंबद्धं भवेत् ।

आप्यमानाः प्रजया धनेन ।[३]

गृहस्थः प्रजया धनेन च पुष्टो भवेत् । तदुपरि शास्त्रानुसारेण – ''ना पुत्रस्य लोकः । 'अपुत्रस्य गतिर्नास्ति' । यथा –

धिग्जीवितं प्रजाहीनं धिग्गृनं च प्रजां विना ।[४]

धिग्धनं चानपत्यस्य धिक्कुलं संतति विना ॥

ऋणानि त्रीण्यपाकृत्य इति ॥ 'इति ॥

गृहस्थाजीवनस्य शिला नारी एवास्ति । गृहस्थ एव समस्तप्राणिनामुपकाराय पूवाचार्यैः परिकल्पितः इति अस्माकं मनीषा । मनुस्मृतिकारोऽपि गृहस्थजीवनस्य प्रशंसांकुर्वन्' कथयति यत् –

या वायुं समाश्रित्य वर्ततन्ते सर्वजन्तवः ।

तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः ॥

---

१. ऋग्वेद–१०/३७/७

२. ऋग्वेद–६/१५/१९

३. ऋग्वेद–१०/१८/२

४. श्रीमद्भागवतमाहात्म्य–४/२९

गृहस्थाऽश्रमं विना ब्रह्मचर्यवानप्रस्थ संन्यासाद्याश्रमस्थाः वस्याऽपि भरणपोषणे परमुखाऽपेक्षिणो भवन्ति, कथं ते परेषां साहाप्यं स्वधास्यन्ति । नूनं गार्हस्थ्यजीवनमेवसर्वोपकारायैव कल्पते, यस्य मूलभित्तिः सुशीला नारी वर्तते । अतोऽत्र पुष्कलं नारीमाहात्म्यवर्णनोपेतं पद्यमेकन्नारीं स्तौति ।

साध्वी शीलवती दयावसुमती दाक्षिष्यलज्जावती
तन्वीव्याजपरामुखी स्मितमुखी मुग्धाः प्रियालापिनी ।
देवब्राह्मणबन्धसज्जनहिता यास्याति भार्या गृहे
तस्यार्थागममोक्षभोगफलदा सेकैव पुण्या लता ॥

अत एव कथितमस्ति यत् वैदिपरम्परायाः प्रथमाङ्गं गृहस्थजीवनमस्ति । वेदेषु पारिवारिकसदस्यानां कर्तव्यपालनस्याप्युल्लेखः प्राप्यते । सर्वे जनाः पय्रस्परं प्रेमभावनया साहाप्यं विधाय द्वेषभावनां परित्यज्य सुखं प्राप्नुवन्तु । यथा विद्वज्जनाः व्यवहारे प्रथमभावं परित्यन्य परस्परं कार्यं कुर्वन्ति तथैव सर्वैः सदस्यैः मैत्रीभावं बौद्धव्यम् । प्रातः सायंकाले च तव मनसि शुभभावना तथा च प्रसन्नता याः वासः भवेत् । यथा -

सहृदयं सामनस्य मविद्वेषं कृणोमि वः । [१]
अन्यो अन्यमभि हर्यत वत्सं जातमिवाध्न्या ॥

अनुवृतः पितुः पुत्रो
मात्रा भवतु संमनाः । [२]
जाया पत्ये मधुमतीं
वाचं वदतु शान्तिवाम् ॥

१. अथर्ववेद-३,३०,१
२. अथर्ववेद-३,३०,२

संक्षेपेणात्रोपप्रकरणे वेदेषु मानवजीवने मनुष्याणां गृहस्थाश्रमः केन प्रकारेण समृद्धिपरिपूर्णः, आनन्दमयः, उन्नतिकारकश्च कथं स्यात् ? इति सर्वविधकल्याणमयं मानवजीवनं स्यादिति निरूपितम् । तथा गृहस्थाधर्मं विना मनुष्यस्ये तदाश्रमवासिनाञ्च कल्याणं कथमपि न शक्यम् इत्यपि वेदादिशाश्रस्त्रस्मृत्यादिभिश्च स्वीकृत्य प्रतिपादितम् । अन्ते च सुभाषितम्

सानन्दं सदनं सुताश्च सुधियः कान्ता न दुर्भाषिणी[1]

सन्मित्रं सुधनं स्वयोषिति इतिश्चाज्ञापराः सेवकाः ।

आतिथ्यं शिवपूजनं प्रतिदिनं मृष्टान्नपानं गृहे

साधोः सङ्गमुपासते हि सततं धन्यो गृहस्थाश्रमः ॥

## ७.४ वेदेषु राजधर्मविचारः

प्राचीनभारतीय राजनैतिकजीवनस्य आरम्भं वैदिकयुगस्य संस्कृत्याः पृष्ठभूम्यां ऋग्वेदकालात् भूतः अस्ति । ऋग्वेदीयकाले समाजः राजनैतिक-दृष्ट्यापि पञ्चभागेषु विभक्तमासीत् । तस्मिन् कुल, ग्राम, विश्, जन, राष्ट्रादीनां समावेशः भवति इत्थं तदा समाजस्य मूलाधारः कुलम् आसीत् । कुलम् इत्यस्य स्वामी गृहपतिः नाम्ना ज्ञायते । यः परिवारजनानामुपरि पूर्णनियन्त्रणं कारयन् आसीत् । कुलाः मिलित्वा ग्रामः भवति । तं स्वामिनं ग्रामणिः नाम्नापि उच्यते स्म । सः ग्रामणिः प्रजायाः रक्षणं, सङ्गठनं, शान्तिः, न्यायः, दण्डादीनां व्यवस्थां कुर्वन् आसीत् । सहायतार्थं ग्रामसभा आसीत् तेन एव ग्रामणेः चयनं भूयते । ग्रामसमूहं विश् नाम्ना उच्यते । तं स्वामी विशपति नाम्ना उच्यते स्म । तस्य मुख्यकार्यं ग्रामाणां पारस्परिक सम्बन्धानां सुव्यवस्था आसीत् ।

---

१. सुभाषितरत्नभाण्डागारम्-पृ.८९, श्लो.६

विशानां समूहः जननाम्ना उच्यतेस्म । तस्य स्वामी जनपतिः नाम्ना ख्यातोऽस्ति। ऋग्वेदे अनु, द्रुह्यु, यदु, पुरु, तुर्वद इति पञ्चजनाः मुख्यरूपेण आसन् । बहवः जनाः मिलित्वा राष्ट्ररूपेण ख्यात जासीत् । राष्ट्रपतेः कार्यं राष्ट्रस्य रक्षणमासीत् । अभिषेककाले राजानम् उच्यतेयत् हे राजन् । भवन्तं राष्ट्रपतिरूपेण स्थापयते । भवान् राष्ट्रस्वामी अस्ति । भवान् ध्रुव-अचल-स्थिरः अस्ति । ऋग्वेदकाले द्विविधाशासनपद्धतिः आसीत् । राजतन्त्रं प्रजातन्त्रं च । राजतन्त्रे राजा परम्परागत आसीत् तथा च नृपस्यचयनं भूयते किन्तु राज्याभिषेकं द्वयोः भूयते स्म । राजा निर्वाचने उत्सुकराजा 'राजकृतः' नाम्ना ख्यातः आसीत् । अथर्ववेदसंहितायां राजकृते पञ्चजनाः भवन्ति । तेषु राजानः ग्रामणिः, सुतः, रथकारः, कर्मारः, इत्यादीनां समावेशो भवति । यथा च-

ये धीवानो रथकाराः कर्मारा ये मनीषिणः ।
सुता ग्रामण्यश्च ये ॥[१]

एते पञ्चजनाः एव नृपस्य निर्वाचनं कुर्वन्तः अभवन् । तदनन्तरं तस्य राज्याभिषेकं भवति । ऋग्वेदसंहितायां प्राप्तोल्लेखानुसारं नृपचयनात् अनन्तरमेव सभा तथा समितेः परामर्शात् एव राज्यसञ्चालनं करोति स्म ।

वैदिककाले सभा-समितिः इति द्विविधा च संस्था आसीत् सभा समितेः नाम्ना संस्था आसीत् । तस्मिन् जनपदस्य उत्तमाजनाः आसन् । तस्य निर्वाचनं भवति । सभायाः मुख्यकार्यं न्यायमेव आसीत् । सा सभा एव राज्ञः चयनं करोति । निष्कासनमपि च करोति । सभायाः सम्बन्धः संपूर्णसमाजस्योपरि आसीत् तथा राष्ट्रस्य महत्वपूर्णा संस्था अभवत् ।

---

१. ऋग्वेदसंहिता-१/११६/५८

अभिभूरहमागमं विश्व कर्मेण धाम्ना ।

आ विश्वत्तमा वो व्रतमावोऽहं समितिं ददे ॥

तदनन्तरं समितेः अपेक्षया सभायाः महत्वं च वर्धितमासीत् तथा सभा न्यायपालिका च भूता तस्य अध्यक्षः राजा आसीत् । समा सदस्यं सभासद नाम्ना उच्यते स्म । तदा सभायाः सदस्यत्वं महतवपूर्णं च मन्यते स्म । इत्थम् वेदेषु राधर्मणः कृते मानवजीवने सभा तथा समितेः विशषं महत्वमासीत् ।

शासनं राज्यं प्रभुत्वमिति प्रायेण समानार्थकम् । ब्राह्मणक्षत्रियविट्शूद्रा राज्ञा दण्डेन पालिता एव स्वेषु वर्त्मसु स्वकर्मधर्माभिरता भवन्ति । दण्डधारको राजा न भवेच्चेत दुर्बलं बलवत्तरा जले मत्स्यानामिव धातयन्तु ।

दण्डाभावे परिध्वंसी मात्स्यो न्यायः प्रवर्तते ।[१]

अग्नी रक्षोहामीवचातनः ।[२]

ततो देवा अपि अराजकतानिवारणार्थं राजानं चक्रुः ।

ते देवाऽब्रुवन्न राजतया वैनो ।[३]

जयन्ति राजानं करवा महा ॥

मात्स्यन्यायाभिभूताश्च प्रजा ।[४]

मनुं वैवस्वतं राजानं चक्रे ॥

ऋग्वेदे तु स्पष्टतः आनुवंशिकं राजपदं दृश्यते । यथा – तृत्सवः चतुरः

---

१. कामन्दकनीतिसार–२,४०
२. अथर्ववेद–१/२८/२
३. ऐन्द्रब्राह्मणम्–१/१४
४. कौषीतकीब्राह्मणम्–१/१२

पुरूषान् यावदासन् । सृञ्जयानां राज्ञों दुष्टरीर्तुहं पौसायनस्य कथायां दशपुरूषान् यावदुल्लेखः । इत्थं राजपदं पैतृकमपि श्रूयते ।

राज्ञा एव राष्ट्रं धार्यते कलाकौशलविद्याभिश्च समृद्धं क्रियते । तस्य राज्यस्य स्वाम्यमात्यजनपददुर्गकोशदण्डमित्राणि सप्ताङ्गानि भवन्ति ।

स्वाम्यमात्यो जनो दुर्गं कोशो दण्डस्तथैव च ।

मित्राण्येताः प्रकृतयो राज्यं सप्ताङ्गमुच्यते ॥

एतैः प्रकृतिस्थैरङ्गैरेव राज्यं दृढं स्थाप्यतो राज्ञां प्रकारविषये वर्णनं प्राप्यते यद् चक्रवर्ती राजा, माण्डलिक राजा, गणाधिपतिः इत्यादि शब्दैः राज्ञां प्रकाराः सन्ति । शासनञ्च विविधाभिः प्रणलीभिविधीयते । ऐतरेयब्राह्मणे नैकसंविधानानां वर्णनं प्राप्यते । देशकालभेदैः प्रणल्योऽपि भिद्यन्ते । तद्यथा –

वैदिकराज्यशास्त्रे यदा कदा राज्यस्य प्रकाराः के ? इति प्रश्ने समुपस्थिते प्रायः सर्वेषां दृष्टिरैतरेयादिब्राह्मणादौ साम्राज्यं, भोज्यम्, स्वाराज्यं, वैराज्यं, पारमेष्ठयं, महाराज्यम्, आधिपत्यं, समन्तपर्यायी, सार्वभौमं, सार्वायुषं, एक राज्यम्, गणराज्य, उग्रम्, विप्रराज्यम्, यहराज्यम्, अपरूद्धम्, जानराज्यं, बहुपाययस्वाराज्यञ्थ आपतति । यथा –

स्वस्ति साम्राज्यं भवति – स य इच्छेदेवंवित् क्षत्रियः सर्वान् लोकान् विन्देत, अयं सर्वेषांराज्ञां श्रेष्ठयं परमतां गच्छेत् साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठयं राज्यं महाराज्यमाधिपत्यं भजेत् । सार्वभौम आयुर्यावत् समुद्रपर्यन्ताया एकराड्भूयात् तमेतेनेन्द्रेण महाभिषेकेणाभिषिञ्चेत् । इत्थमष्टप्रकाराः सम्राजः वर्तन्ते ।

इत्थमत्र राज्यसञ्चालनपद्धतिद्वारा, भूपतीनाञ्च विभाजनद्वारा राजधर्मस्य उत्तमविचारा: समीक्ष्य निरूपिता: सन्ति । प्रकरणविस्तारभयादिह परिसमाप्यते ।

## ७.५ वेदेषु उत्तमप्रबन्धविचार:

राज्यसञ्चानले तस्य प्रबन्ध: केन प्रकारेण भवेदिति विषयसम्बद्धा: विचारा: वेदेषु: सम्यक्तया निरूपिता: सन्ति । राज्यप्रबन्धस्य मुख्याधार: अर्थव्यवस्था वर्तते । अत एव निरूप्यते राज्यसञ्चालने संगठने च कोश: परमोपयोगी पदार्थ: विद्यते ।

वैदिकर्षिभि: तस्य महदावश्यकतां परिवीक्ष्य राजकोशसञ्चयस्य द्वौ साधनौ निर्देशितौ तत्र प्रथमं साधनं प्रजयाप्राप्तधन–धान्यादिकं, द्वितीयं शत्रुराज्योपरिविजयमवाप्य प्राप्तं धनम् ।

वैदिकवाङ्मये राष्ट्रसंचालनार्थं करग्रहणस्य परम्परा वेदकालादेव प्रचलिता लभ्यते । तत्र करशब्देन सह वक्ष्यमाणानां सामार्थकानां बलिशुल्कादीनां पर्यालोचनेन यदयं कर: अपराधिनां कृते दण्डरूपेण स्थित: । तथा चानेन राजकीयकोषस्यार्थव्यवस्थाया अपि सम्पन्नता भवति स्म । वैदिको राजा शासनाधिकारी दण्डाधिकारी वा न केवलं शारीरिकदण्डे अपितु अर्थादिभिरपि अपराधिन: दमयति स्म । आर्थिकपक्षेणापि राजा प्रजाया: पालनं सर्वसंरक्षकत्वं च निर्वहति । एतदर्थं प्रजा तस्मै करं ददाति । अर्थाद् यथा राज्ञ: प्रजापालनरूपो धर्म: भवति । तथैव प्रजानामपि भवति करदामस्य कर्तव्यता । अनया व्यवस्थायैव प्रचलति स्म तत्कालीनो व्यवहार: राजप्रजयोरिति । मन्त्रादिना प्रोक्ता: करशुल्कबलिशब्दा वेदमूलका एव । यथा –

योऽरक्षनबलिमादत्ते करं शुल्कं च पार्थिवः ।

प्रतिभागं च दण्डं च सद्यो नरकं व्रजेत् ॥[१]

विशश्चक्रे बलिहितः सहोभिः ।[२]

यस्य विश्वानि हरतयोः पञ्चक्षितीनां वसुः ।[३]

अत्र मेधातिथिः बलिः, धान्यादेः षष्ठोभागः – करः द्रव्यादानेम्, शुल्कं वणिक्प्राप्यभागः वर्णयति । वेदेषु विविधानां कराणां सपष्ट्येल्लेखो लभ्यते । तत्र तेषामुपयोगस्य परिणामादेश्चापि सङ्केताः सन्ति । तद्यथा यद् राजानो विभज्यन्त इत्यारभ्य प्रजया प्रतिगृहय विराधिषि इत्यन्तेन सूक्तेन प्रदर्श्यते ।

प्रजाभ्यः करग्रहणेन, खनिभ्यः सुवर्णरत्नानामुद्धरणेन राज्ञा कोशः पूरणीयः । वेदेषु करशब्दस्यार्थौं बलिपदेन गृह्यते । प्रजाभ्यो गृहयमाणा मिता मात्रा बलिरुच्यते ।

इयं मात्रा मीयमिना मिता च

सजातांस्ते बलिहतः कृणोतु ।[४]

राजा प्रजापोषणाय प्रजाभ्यो बलिवत् स्यात् ।

वयं तुभ्यं बलिवत्ः स्याम ।[५]

विशश्चक्रे बलिहतः सहोभिः ।[६]

---

१. मनुस्मृति–८,३०७
२. ऋग्वेद – ७,६,५
३. ऋग्वेद – १, १७६, ३
४. अथर्ववेद – ११, १, ६
५. अथर्ववेद–१२, १, ६२
६. ऋग्वेद–७,६,५

अथो त इन्द्रः केवलींहृतस्करत् ।[1]

हरन्त्यस्मै विशो बलिम् ।[2]

अनेन करस्वरूपेण लब्धद्रव्येण राष्ट्रसंरक्षणं प्रजापालनं दुष्टनिग्रहणादिकं च भवति । करदानेन राष्ट्रस्य प्रजायाश्च समस्तानां सङ्कल्पनां पूतिर्जायते । चौराः दस्यवः अन्ये हिंसकाः शत्रवश्च राज्यभयाद पलायन्ते । फलतः सर्वैः सह राष्ट्राभिवद्धिर्जायते । करदाताऽपि सर्वदा राजनियमैश्च निर्भयः सन् स्वसमृद्धिं करोति । शुल्कमिदं सर्वैः सम्मानितं स्वीकृतं यः शत्रुनाशकाय शासकाय समर्पयति सः स्वर्गं याति । मेधातिथेर्मानवभाष्यानुसारं शुल्कशब्दस्य वणिक् प्राप्यः भागः इति अथे कृते सति एवं ज्ञायते यत् तस्मिन्कालेऽपि आयकरः आसीत् ।

बलिशब्दस्य सायणानुसारेणायं करः शालानिमित्तकः ध्वन्यते । यद्यपि तस्मिन्युगे सम्बद्धाधिकारिणो जनेभ्यो विविधान् करान् सेङ्कलयन्ति स्म, तथापि तत्सर्वं पश्चात् राज्ञे प्रयच्छन्ति स्म । अर्थाद्राजा एव करग्रहणस्य एकः अधिकारी वर्तते । यथा -

ध्रुवं ध्रुवेण हविषाऽभि सोमं मृशामसि ।[3]
अथो त इन्द्रः केवलीर्विशो बलिहतस्करत् ॥

यस्यै हस्ताभ्यां पादाभ्यां वाया श्रोत्रेण चक्षुषा ।[4]
यस्यै देवाः सदा बलिं प्रयच्छति ॥

---

१. ऋग्वेद-१०, १७३, ६
२. तैत्तिरीय ब्राह्मणम् - २, ७, १८, ३
३. अथर्ववेद-१०, १७३, ६
४. अथर्ववेद १०/७/३९

तथैव

दूरे पूर्णन वसति दूर ऊनेन हीयते ।[१]

महद्यक्षं भुवनस्य मध्ये तस्मै बलिं राष्ट्रभृतो भरन्ति ॥

अनेन सम्बद्धानि अन्यानि रक्षाकर सम्बद्धानि प्रतीकान्यपि द्रष्टव्यानि । अयं करो विशेषतो विशां कृते वर्तते । यथा –

दिशः प्रदिशः करदिच्छिवास्ते ।[२]

इमा विशो अभि हरन्तु ते बलिम् ॥

प्रतिदिवसं दीयमानस्य करस्य सङ्केतो यथा –

अहरहर्बलिमित्ते हरन्तोऽश्वायेब

तिष्ठते धासमग्ने ।[३]

संग्रामकरो यथा –

उत्तिष्ठ त्वं देवजनार्बुदे सेनया सह ।[४]

अयं बलिर्व आछूतस्त्रिषनधेराहुतिः प्रियाः ॥

वदेषु भागधुग, संगृहीता, गणकादिशब्दाः राजकोश–सञ्चये प्रयोजिताः दृश्यन्ते ।

संक्षेपेणात्रेदं विज्ञाप्यते राज्यस्य कोशादिव्यवस्थाभिः समृद्धिपूर्णं सर्वाङ्ग समृद्धिपरिपूर्णं प्रबन्धनं कथं स्यादिति निरूपितम् ।

---

१. अथर्ववेद–१०/८/१५
२. अथर्ववेद–१९/४५/२
३. अथर्ववेद–१९/५५/६
४. अथर्ववेद ११/१०/५

## ७.६ वेदेषु श्रेष्ठमानवनिर्माणस्य सङ्कल्पना ।

वयं तात्विकरीत्या ज्ञानमीमांसा वा तत्त्वमीमासायाश्च विचारद्वारा जानीमः यत् विश्वमिदं मूलसत्ताद्वारा उद्भूत तथा निर्मित उपकरणानां संधातस्य परिणाममस्ति । विश्वसृजन विषयकेभ्यः युगेभ्यः ज्ञानविज्ञादीनां सहाय्येन आन्तरिकं – बाह्यञ्च विश्लेषणं कृतमस्ति । जगति अस्मिन् चेतन तत्वस्य अधिकं महत्वं वर्तते, कारणं चेतनं गतिमानं सजीवमस्ति तथा सृष्टेः भौतिकं समन्वयं तदर्थमेव अस्ति । जीवधारिषु मानव एव तादृशः प्राणी वर्तते यः विवेकबुद्धया समन्वितो विराजते । महाभारते लिखितमस्ति यत् ब्रह्मरहस्यं तदेवास्ति यत् जगति मानव एव सर्वश्रेष्ठः विद्यते । यथा –

गुह्यं बहम तदिदं ब्रवीति
न मानुषाच्छ्रेष्ठतरं हि किंञ्चित ॥[१]

पाश्चात्यचिन्तकाः एतस्मिन् संसारे मानवात् श्रेष्ठः किमपि नास्ति । मनुष्यः एव सृष्टिमध्ये प्रणाम अभिव्यक्तिं कर्तुं समर्थोऽस्ति । पास्कलमहोदयस्य मतमस्ति यत् मनुष्यः संसारस्य सर्वश्रेष्ठः बौद्धिजीवः वर्तते । मनुष्य ज्ञानस्य प्राप्तिः तथा तस्याः अभिव्यक्तिं कर्तुं शक्नोति तथा तस्य मतानुसारं उत्कृष्टकर्म कृत्वास्वस्योत्कर्षं विधातुं शक्नोति । यथा

स मृज्यते सुकर्मभिः ॥[२]

अर्थात् सम्यक् कर्मणा मनुष्यः परिमार्जितं भूत्वा सर्वश्रेष्ठं भवति ।

मा स्रेधत् सोमिनो दक्षत ।

---

१. महाभारतम् शा.प.८०/१२
२. ऋग्वेद ९/९९/७

हे सोम्यमनुष्याः, त्वं हतोत्साहं न भूत्वा पुरूषार्थं कुरु तथा स्वस्य कल्याणं कुरू । कारणं कल्याणमार्गमेव श्रेष्ठतायाः मार्गः वर्तते । उपनिषदि अपि कथ्यते यत् मनुष्यः विश्वशक्त्याः सुकृतिःविद्यते ।

'कृण्वन्तु सर्वे अमृतपुत्राः' हे अमृतपुत्राः । सर्वे कृण्वन्तु । एतदेवास्ति मानवजातेः कृते सम्बोधनम् । सभासु भाषणात् पूर्वं भ्राताभग्नियश्चेति एतादृशं सम्बोधनं नास्ति । अत्र तु सम्बोधनं साम्प्रदायिकं नास्ति ।

अमृतस्य पुत्राः अर्थात् समस्त मानवजातिः अमृतपुत्राः सन्ति । अमरतायाः सन्ततिः अस्ति । यः अक्षयानन्दस्य स्रोतः सच्चिदानन्दस्वरूपस्य, अमृतधाममोक्षपाधिकारिणः परमपितुः परमात्मनः सन्ततिः अस्ति । कोऽपि एकः ईश्वरपुत्रः नास्ति किन्तु ऋग्वेदानुसारं समस्तसृष्टिः ईश्वरपुत्र अस्ति ।

हे अमरपितुः पुत्रः मरणधर्ममनुष्यः इति कीदृशः विरोधः । विश्वकविः रवीन्द्राथटगौर गीताञ्जलिमध्ये एतदेव भावं लिखति यत् Thou hast made me immortal भवता मां अमरः कारितोऽस्ति किन्तु अहम् अमरन् अभवत् । अहं तु मृत्योः शरणं च गतोऽस्मि तथा आवागमनयाः चक्रं गतोऽस्मि ।

चिन्तामास्तु । यदि अहमेकवारम् अनुतीर्णः अभवत् । मम पितुः विद्यालये अनुतीर्ण भवितुं नैव प्रेषितः अहं पुनःयत्नं कृत्वा उत्तीर्णः भविष्यामि ।

मानवजीवनं बहुश्रेष्ठमस्ति । एषा पशुता, मानवा तथा देवतत्त्वस्य, संयोगः अस्ति । एतदेव संस्थारस्य क्रियानां मूलास्रोतः वर्तते । विदुषाम् मतेन मनुष्यः विश्वस्य सूत्रमस्ति । वस्तुतः एषः मनुष्यः ईश्वात् किञ्चिदेव अधः अस्ति ।

मानवः संसारस्य मूलं केन्द्रं मन्यते तेषां सर्वेषां कृते एका समस्या वर्तते । सम्भवमस्ति यत् मानवः संसारस्य सर्वाणि रहस्यानि अगच्छेत् किन्तु स्वस्य कृते एकं रहस्यसूत्रमास्ति । मानवः अस्तित्वविषये उत्सुकं भूत्वा स्वपरिवेशस्य परीक्षणकरोति । अतः समस्त ज्ञान–विज्ञान–दर्शन–इतिहास–मनोविज्ञान–मानवशास्त्र–धर्म–नीतिशास्त्रादीनां चिन्तनं मननं मनुष्यस्य केन्द्रबिन्दुः वर्तते । आत्मज्ञानात् दीप्तजीवनमेव चेतनायाः लक्षणमस्ति । ऋग्वेदे अस्ति आत्मा मनुष्येषु अमरज्योतिः रूपेण विराजते । यथा –

इदं ज्योतिस्मृतं मर्त्येषु ।[१]

ध्रुवं ज्योतिनिहितं द्वशयेकम ।[२]

एतादृशम् अमृतज्योतिस्वरूपं मानवजीवनं परिकल्पितम् । तादृशमेव मानवजीवनं सर्वश्रेष्ठं परिज्ञायते ।

श्रेष्ठसमाजस्य निर्माणं कर्तुं ज्ञानविज्ञानादीनां संशोधनं करणीयं भवति । यत् व्यक्तिगत सम्भावनां सामाजिकविरोधं विना विकासं कारयेत् तथा तेन एक मनुष्यः द्वितीयमनुष्याय कार्य कारयेत् । एतस्मिन् विषये ऋग्वेदे संज्ञानसूक्ते कथितमस्ति यत् मनुष्येण परेभ्यः शासनात् पूर्वं स्वस्योपरि शासनं करणीयं भवति तथा प्रत्येकमनुष्यं परेभ्यः आदरभावमपि करणीयं भवति । सर्वे प्राणिनः सुखिनः भवेयुः तावद् संसारः आवश्यकोऽस्ति । एतदर्थं सर्वे जनाः परस्परं सद्भावयुक्ताः भवन्तु ।

यथा नः सर्व इज्जनः संगत्या सुमना असत् ।[३]

---

१. ऋग्वेद–६/९/४

२. ऋग्वेद–६/९/२०

३. ऋग्वेद–१०/१९१

एषा भावना ईश्वरस्य सन्मानं करोति । अहंकारवृत्तिः या मानवीय दु:खानां कारणमस्ति यदा धर्मक्षेत्रे आगता हि धर्म तथा मानवस्वतन्तायाः हननं कृतम् । मानवव्यवहारआधारभूता शक्तिः स्वतन्त्रतायाः आध्यात्मिकरूपमस्ति यत् मनुष्यस्य हृदि स्थितास्ति । यदि सर्वे परेभ्यः सद्भावना, आदरं कर्तव्यभावनां करोति चेत् मानवजीवनस्य कटुसंघर्षः मङ्गलमयरूपेण परिवर्तितो भवति ।

अतः एवोच्यते यत् –

आत्मवत् सर्वेभूतषु ।[१]

श्रीमद्भगवद्गीतायामपि कथ्यते । यथा –

परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ।[२]

इत्थमत्र वेदस्य सकलोत्तमविचाराणामचरणेन, ईश्वरीयतत्वानुसन्धानेन, ज्ञानविज्ञाभ्यां, सर्वकल्याणस्य सद्भावनादिभिश्च श्रेष्ठमानवनिर्माणस्य वेदेषु स्पष्टतया वर्णितास्ति, सा चेह सविशदं समीक्ष्य निरूपिता । इतोऽप्यधिकं विस्तारपूर्वकं वेदेषु मानवस्य श्रेष्ठजीवनस्य उदात्तं चिन्तनं प्रतिपादितमस्ति, किन्तु प्रकरणस्य विस्तारभयात् समाप्यते ।

---

१. ऋग्वेद–

२. श्रीमद्भगवद्गीता